
ज्येष्ठमासः (द्वितीयः)
वर्षम् – ६८
अष्टमोऽङ्कः
विक्रमाब्दः २०७५
युगाब्दः ५१२०
५ जून २०१८

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | ६ |
| ५ | ग्रामस्य वणिजः-शान्तिलालः अन्ये च। | डॉ. हर्षदेव माधवः | ७ |
| ६ | संस्कृत-वाङ्मये जनहित-भावः | सोहनलाल शर्मा | ८ |
| ७ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १३ |
| ८ | पिता | डॉ. हर्षदेवमाधवः | १५ |
| ९ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १६ |
| १० | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १७ |
| ११ | भारतभूम्याः विभूतयः | अविनाश शर्मा | १८ |
| १२ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | २१ |
| १३ | पुराणलक्षणम् | अवधेश कुमार | २२ |
| १४ | संस्कृत चित्रशिक्षणम् | श्वेता दाधीच | २५ |
| १५ | स्मृतिकाव्यकालयोः गुरु-शिष्यसम्बन्धः | ओमप्रकाश अग्रवालः | २६ |
| १६ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १७ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

श्रीकृष्णं कलवेणुवादनपरं योऽवर्णयल्लीलया,
रासे रासरसालयस्य चरितं प्रादर्शयद् योऽद्भुतम्।
लीलां कृष्णशिशोः शुभां सुमधुरां योऽगायदानन्ददाम्,
प्रेम्णा कृष्णपरायणाय मुनये व्यासाय तस्मै नमः।।

## मासावतरणम्

मासोऽयं पुरुषोत्तमेति कथितो विष्णुस्वरुपो बुधैः,
श्रीमद्भागवतं पुराणमधुना शृण्वन्ति वै बान्धवाः।
मोक्ष-प्राप्ति-धिया स्त्रियः शुभदिने कुर्वन्ति दानं तथा,
मासेऽस्मिन् विधिपूर्वकं परिणयो विष्णोस्तुलस्या सह।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

ज्येष्ठमासः ( द्वितीयः )
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2075
जून, 2018
अङ्कः - 8
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# वर्तमानशासनस्य विकासकार्याणि

...✍ पं. प्यारेमोहनशर्मा

भगीरथो गङ्गां भूमावानयदिति तु सर्वे जानन्ति। परन्तु इतः पूर्वं विनायकः स्वमित्रेण मयूरेशेन सह स्वगणैः हिमखण्डानत्रोटयत् तदा सुरसरिता स्वकीयेन पूर्णवैभवेन उद्दामयौवनेन दीर्घायुषा सह हिमालयात् वाराणस्यामन्येषां नगराणां च निकटात् प्रवहन्ती समुद्रपर्यन्तं क्वचित् मन्थरगत्या क्वचिच्च तीव्रगत्या अगच्छत्। गङ्गायाः मधुरेण जलेन लोकजीवनं सरलं सुविधामयमानन्ददायकं चाभवत्। सोमकान्तः स्वमित्रस्यानेनोपकारेण शीघ्रमेवोऋणं भवितुमैच्छत्। अनेकवारमामन्त्रणानन्तरमपि विनायकस्य काश्या-मागमनम् अत्यन्तं विपरीतस्थितिकाले समभूत्। विनायकः स्वसैन्यदलस्य सहायतायै समुपस्थितोऽ-भवत्। सोमकान्तस्तत्र राजा आसीत् स स्वकीयं सम्पूर्णं राज्यं दत्वापि उऋणो न भवितुं शक्नोतिस्म। तस्य मनसि एष एव भावः प्रबलरूपेण अविद्यत। नदीतीरे स्थिते भूमिभागे ये राजान आसन् तेषां मनसि अपि एष एव भावः आसीत्। अनेके राजानः विनायकेन मिलित्वा कृतज्ञतां प्राचीकटन्। विनायकस्य ख्यातिः सर्वत्र प्रासरत्।

एकदा सन्ध्यासमये विनायकः गङ्गातटे रमणीयेऽति भव्ये उद्याने अभ्रमत्। सूर्यः सुरसरितायां स्वकीय-स्वर्णकिरणैः शोभां वर्धापयन् अस्ताचलं प्रयातिस्म। अमुं चित्ताकर्षकं दृश्यं दृष्ट्वा विनायको मुग्धः संजातः। इत्थं प्रतीयतेस्म तत्रत्यः सर्वः परिवेशः स्वर्गमयः संजात इति। उद्यानमध्ये स्थितस्य गणाध्यक्षस्य स्वर्णाभामण्डितं मन्दिरं दृष्ट्वा स चकितः संजातः। स्वर्णाभामण्डितस्य मन्दिरस्य सन्ध्याकालीनसूर्यस्य स्वर्णमयी चमत्कृतिः शोभां द्विगुणितां करोतिस्म।

काश्याः नागरिकाणां कृते नेदं केवलामाराध्यस्थल-मासीत् अपितु नगरदेवस्य वासस्थलमप्यविद्यत। शुभकार्यारम्भे अथवा संकटनिवारणाय सर्वतः प्रथमं गणाध्यक्षस्य शिरसा प्रणामः परमावश्यक आसीत्। सुदूरस्थानेभ्यः प्रातः सायं जनाः गणाध्यक्षं प्रणमितुं नियमितरूपेणात्रागच्छन्। सम्प्रति सूर्यस्यास्तगमनसमयः समागतः सूर्यदेवः स्वकीयानश्वान् अमोचयत्। दीपप्रज्वालनं प्रारभत अधुना गोधूलिवेलया सह सन्ध्यायां मन्दिराणां रूपाणि नवीनान्यभवन्। आरतीस्वरा अगुञ्जन्। वैदिकमन्त्राणां घोषः प्रारभत इत्थं प्रतीयतेस्म यद्विनायकः पूर्वमेव सर्वमजानात्। केवलं मन्त्रोच्चारणस्यारोहावरोह-क्रमः कर्मकाण्डस्य व्यापकतायाः स्वरूपं नवीनं प्रत्यभासत। धर्मानुष्ठाननामा एषा क्रिया विनायक-मरोचत। किञ्चित्कालानन्तरं यदा मन्दिरं जनशून्यं संजातम्। तदा विनायको मन्दिरमगच्छत्।

इत्थं सुदीर्घः कालो व्यतीतः। विनायको यां गङ्गामानयत् सापि शनैः शनैः कृशकाया संजाता इतश्च राज्ञः सगरस्य षष्टिसहस्रपुत्राः कपिलऋषिक्रोधाग्नि-भस्मीभूताः संजाताः। ततो भगीरथः स्वपूर्वपुरुषानुद्धर्तुं घोरं तपोऽतप्यत। तस्य तपसा प्रसन्नो विष्णुः गङ्गां भूमौ गत्वा भगीरथस्य पूर्वजानुद्धर्तुमादिदेश। परन्तु गङ्गायाः तीव्रतरं प्रताहं को धारयिष्यति? अन्यथा गङ्गा भूमिं भित्त्वा पातालं गमिष्यति ततः भगीरथः तपसा शिवमाशुतोषमाराधयामास प्रसन्नं शिवं गङ्गां धारयितुं प्रार्थयत्। इत्थं भागीरथो गङ्गया स्वपूर्वपुरुषाणामुद्धारम-करोत्। परन्तु सहस्रशो वर्षानन्तरं सम्प्रति गङ्गाप्रवाहः

पुनः क्षीणः दूषितश्च संजातः। 1947 तमे वर्षे सहस्रशो भारतीयानां बलिदानानन्तरं भारतं स्वतन्त्रं संजातम्। स्वतन्त्रभारतस्य प्रथमः प्रधानमन्त्री पं. जवाहरलाल-नेहरूमहोदयः समभवत्। स पञ्चवर्षीययोजनामरचयत्। तदनन्तरं येऽपि प्रधानमन्त्रिणः समागताः ते सर्वे सत्ताप्राप्तये लोकाकर्षकाणि राजनीतिलाभप्रदानि कार्याणि समाचरन् नहि कोऽपि गङ्गाजलशोधविषयेऽचिन्तयत्। यद्यपि राजीवगान्धी-काले गङ्गाजलं शोधयितुं यन्त्रव्यवस्था कृता परन्तु सा व्यवस्था सफला न जाता।

भगवतः कृपया शिवभक्तो नरेन्द्रमोदी महोदयः प्रधानमन्त्रि पदमलञ्चकार। सर्वतः प्रथमं वाराणस्यां गङ्गापूजनानन्तरं तस्मादेव नगरात् पञ्चलक्षमतैः निर्वाचितो नरेन्द्रमोदी गङ्गां शोधयितुं उमाभारतीं पृथक् गङ्गाशोधिकामन्त्री न्ययोजयत् सोऽयं मोदी कोटिशो-रूप्यकाणि तदर्थं स्वीचकार। परन्तु विगतषष्टिवर्षेषु प्रभावशालिनो धनाढ्याः तत्कालीनसर्वकारेण, मन्त्रिभिः अधिकारिभिश्च मिलित्वा गङ्गातटेषु यन्त्राणि बृहन्ति संस्थानानि अस्थापयन् तेषां संस्थानानां दूषितं जलं गङ्गायामेवागच्छति। सम्प्रति कोटिशो रूप्यकैः स्थापितानि तानि संस्थानानि न कोऽपि ततः परावर्तयितुं शक्नोति। परन्तु प्रधानमन्त्री नरेन्द्रमोदी सततं विशिष्टान् यन्त्रनिर्माणकुशलान् तदर्थमावाहयति। इत्थमेव स्वच्छभारतम् इत्यपि महोदयेनानेनैव समुद्घोषितम्। ग्रामे ग्रामे गृहे गृहे शौचालयनिर्माणाय योजनापि अनेनैव समारब्धा।

विगतचतुर्षु वर्षेषु यानि विकासकार्याणि महोदयेनानेन विहितानि तानि सम्पूर्णं विश्वं प्रशंसति। अयमेव प्रथमः प्रधानमन्त्री यः विश्वस्य सर्वेषु राष्ट्रेष्वगच्छत्। तैः सह मैत्रीपूर्णाः सम्बन्धाः संस्थापिताः। सर्वाणि राष्ट्राणि मोदीमहोदयं प्रशंसन्ति। यत् कार्यं पञ्चाशत्वर्षेषु भवितुं शक्नोति तत् चतुर्षु वर्षेषु तु सम्पूर्णतां नहि कोऽपि प्रापयितुं समर्थः।

अत्रैकमुदाहरणं प्रस्तौमि - एकदा कश्चित् शिक्षितः सभ्य राजपुरुषः बसयानेन यात्रां करोतिस्म। तस्मिन्नेव बसयाने कश्चित् ग्रामीणो युवकोऽपि यात्रां करोति स्म। किञ्चित् कालानन्तरं तस्य युवकस्य ग्रामः समागतः, स तत्र बसयानादवातरत्। राजपुरुषोऽपि तत्रैवावतरत्। स तं युवकमकथयत् यदहं तव ग्रामं द्रष्टुमिच्छामि तेनोक्तम् आम् वृषभशकटीमुपविशतु चलतु च। स भद्रपुरुषः मार्गे तमपृच्छत् भवान् निर्वाचने कस्मै मतं प्रयच्छति। ग्रामीणोऽवदत् नरेन्द्रमोदीमिति अन्ये ग्रामवासिनः कस्मै प्रयच्छन्ति तेनोक्तं सर्वे ग्रामवासिनो मोदीमेव प्रयच्छन्ति। सभ्यपुरुषः पुनः अपृच्छत् तत्र को हेतुः। स अवदत् एष भव्यो राजमार्गः गृहे गृहे स्वच्छाः शौचालयाः शुद्धं मधुरं जलम् अहर्निशं विद्युद्विद्योतनम्, दूरदर्शनं, सर्वमिदं मोदी सर्वकारः ग्रामेभ्यः प्रायच्छत्। अस्माकं ग्रामः पार्श्वस्थाः ग्रामाः सर्वे नरेन्द्रमोदीमहोदयाय एव स्वं मतं प्रथच्छन्ति। इतः पूर्वं वयं भारतं स्वतन्त्रं संजातमिति अशृण्म परन्तु स्वतन्त्रतायाः कोऽर्थः इत्यपि नैव जानामः सम्प्रति अस्माकं ग्रामेषु विद्यालयाः सन्ति तत्रास्माकं बालका बालिकाश्चाध्ययनं कुर्वन्ति। अतो वयं तु तस्मै एव मतं दास्यामः।

सैषा घटना द्योतयति यत् मोदीसर्वकारकाले बहूनि विकासकार्याणि जातानि परन्तु प्रचारः प्रसारश्च यथोचितं नाभवत्। परन्तु ''पुरोभाग'' स्तु दोषैकदृक् भवति अतः स तु न्यूनतामेव पश्यति। अस्तु अन्ते च निवेदयामः-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग् भवेत्।।**

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्ण:शरणं मम )

( पूर्वानुवृत्तम् )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

## अथ ध्यानम्- ( वन्दना )

हयग्रीवासुरं हन्तुं हयग्रीवोऽभवद्धरिः।
हंसः परमहंसानां श्रीकृष्णः शरणं मम।। 53।।

महाशक्तिर्महातेजाः पर्शुरामो विभूतिमान्।
जामदग्न्यो हरेरंशः श्रीकृष्णः शरणं मम।। 54।।

पराशरात्मजो वेद-व्यासः सत्यवतीसुतः।
धर्मज्ञानतपोमूर्तिः श्रीकृष्णः शरणं मम।। 55।।

भारते ब्रह्मसूत्रे च पुराणोपनिषत्सु च।
वेदानां व्यसनाद् व्यासः श्रीकृष्णः शरणं मम।। 56।।

क्रान्तद्रष्टा कविर्विज्ञोऽ द्वैतवेदान्तदर्शनः।
आद्याचार्यो हरेरंशः श्रीकृष्णः शरणं मम।। 57।।

हरिर्मत्स्यो हरिः कूर्मो नृसिंहो वामनो हरिः।
ज्ञेयः सर्वावतारेषु श्रीकृष्णः शरणं मम।। 58।।

त्रेतायां भगवान् रामो मर्यादापुरुषोत्तमः।
एकपत्नीव्रती भूपः श्रीकृष्णः शरणं मम।। 59।।

आर्यावर्तधरा धन्या धन्याऽयोध्यापुरी प्रजा।
प्रादुर्भूतः स्वयं विष्णुः श्रीकृष्णः शरणं मम।। 60।।

योगिहृत्पङ्कजावासो रामो रन्तुं रघूत्तमः।
कौशल्यागर्भसम्भूतः श्रीकृष्णः शरणं मम।। 61।।

राघवेन्द्रश्चतुर्मूर्तिर्भुवो भारहरो हरिः।
श्रीमद्दाशरथी रामः श्रीकृष्णः शरणं मम।। 62।।

रामो नारायणः साक्षात् सूर्यवंशसमुद्भवः।
कोटिकन्दर्पलावण्यः श्रीकृष्णः शरणं मम।। 63।।

सीतालक्ष्मणसंयुक्तः श्रीरामो हनुमत्प्रभुः।
मायाजीवयुतं ब्रह्म श्रीकृष्णः शरणं मम।। 64।।

सौमित्रिभरतादिभिर्भ्रातृभिः सेवितः प्रभुः।
जानकीवल्लभो रामः श्रीकृष्णः शरणं मम।। 65।।

सेतुकृद्रामचन्द्रश्च शिवेष्टः शिवपूजकः।
रामेश्वरप्रतिष्ठाता श्रीकृष्णः शरणं मम।। 66।।

निहन्ताऽसुरसैन्यानां रावणारी रघूत्तमः।
त्राता गोविप्रसाधूनां श्रीकृष्णः शरणं मम।। 67।।

आदित्यहृदयस्तोत्रं भक्त्या लङ्का-मृधे जपन्।
विजयी विक्रमी वीरः श्रीकृष्णः शरणं मम।। 68।।

कुम्भकर्णदशग्रीवनिहन्ता धर्मरक्षकः।
धनुर्बाणधरो रामः श्रीकृष्णः शरणं मम।। 69।।

अप्रमेयबलो रामो विभीषणवरप्रदः।
सीतादर्शनसंहृष्टः श्रीकृष्णः शरणं मम।। 70।।

सुग्रीवनलनीलाद्यैराञ्जनेयाङ्गदादिभिः
कपिसैन्यदलैः सेव्यः श्रीकृष्णः शरणं मम।। 71।।

राज्येऽभिषिक्तः श्रीरामश्चतुर्वर्गफलप्रदः।
सुखदः शान्तिदः सौम्यः श्रीकृष्णः शरणं मम।। 72।।

प्रपन्नोऽहं तवास्मीति याचतेऽभयदः प्रभुः।
शरण्यो वरदो रामः श्रीकृष्णः शरणं मम।। 73।।

रोहिणीनन्दनोऽनन्तो वासुदेवो हलायुधः।
नीलाम्बरधरो रामः श्रीकृष्णः शरणं मम।। 74।।

द्वापरे भगवान् कृष्णः श्रीलीलापुरुषोत्तमः।
सहस्रषोडशस्त्रीशः श्रीकृष्णः शरणं मम।। 75।।

गोविप्रसुरसाधूनां परित्राणपरायणः।
यदूत्तमोत्तमश्लोकः श्रीकृष्णः शरणं मम।। 76।।

वासुदेवो जगन्नाथो देवकीनन्दनो हरिः।
आविर्भूतः परं ब्रह्म श्रीकृष्णः शरणं मम।। 77।।

नन्दगोपसुतः कृष्णो यशोदाऽऽनन्दवर्धनः।
गोकुलानन्ददः श्यामः श्रीकृष्णः शरणं मम।। 78।।

सिद्धार्थो बोधितो बुद्ध्या विरक्तो ध्यानमास्थितः।
सिद्धेऽर्थे भगवान् बुद्धः श्रीकृष्णः शरणं मम।। 79।।

युगान्ते युगसन्ध्यायां भाव्यः कल्किर्जगत्पतिः।
सर्वेष्वेवावतारेषु श्रीकृष्णः शरणं मम।। 80।।

जय जय श्रीकृष्णमन्त्रमहास्तोत्रे द्वितीयो विरामः।।

''श्रीकृष्णः शरणं मम''

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )

राजनैतिकी वस्तुस्थितिः

❑ डॉ. हर्षदेवमाधवः

# ग्रामस्य वणिजः-शान्तिलालः अन्ये च।

कोलियाकग्रामः भावनगरमण्डले समुद्रस्य रमणीये तटे वर्तते। मम कौमारयुवावस्थयोः दिवसाः तत्र व्यतीताः। कोलियाकग्रामस्य निकटे माल्यश्रीनदी तस्य चरणं प्रक्षालयन्तीव प्रवहति। वट-तिन्तिडी-स्नुहि-बर्बुर-विजलादीनां वृक्षाणां परिवारः तत्र सानन्दं निवसति स्म। ग्रामे एका प्राथमिकशाला, एका माध्यमिकशाला, एकं चिकित्साकेन्द्रम्, एकः पत्रालयः एकश्च बैंककार्यालयः ग्रामस्य समृद्धिरासीत्। कोलियाकग्रामस्य पार्श्वे नद्याः अन्यस्मिन् तटे गुन्दिग्रामः अस्ति। तत्र क्षत्रियजनाः निवसन्ति। कोलियाकग्रामः पञ्चग्रामाणां मध्ये वर्तते, अतः ग्रामजनाः सर्वेभ्यः ग्रामेभ्यः वस्तुक्रयार्थ कोवियाकग्रामं आगच्छन्ति स्म। मध्ये समुद्रं निष्कलंकमहादेव इति ख्यातः। भगवतः शिवस्य पञ्चलिङ्गानि अनवरतं समुद्रजलाभिषिक्तानि सन्ति। समग्रे दिवसे चतुर्विंशतिघण्टासु केवलं सार्धैक-होरापर्यन्तं महादेवस्य दर्शनं, यदा समुद्रजलं वेलावशात् परावर्तते, तदा भवति। जनाः कथयन्ति स्म यद् इमानि लिङ्गानि पञ्चपाण्डवैः स्थापितानि सन्तीति। महाभारतस्य युद्धोत्तरं पाण्डवाः स्वपापानि क्षालयितुं अत्र आगत्य निष्पापाः बभूवुरिति प्रसिद्धिः।

ग्रामस्य विपणिः नातिविशाला, किन्तु वणिजः समृद्धाः आसन्। यतः परितः स्थितानां ग्रामजनानां इयं विपणिः क्रयविक्रयक्षेत्रमासीत्। मुग्धाः कृषीवलाः स्वक्षेत्रेभ्यः शाकादिकम् अत्र आनीय विक्रीणन्ति स्म।

अहं तदा दशम्यां कक्षायाम् अपठम्। शान्तिलालः सर्वेषां वणिजां मुख्यः आसीत्। तस्य भ्राता मधुकान्तः अपि तस्य व्यवसाये सहचरः। शान्तिलालस्य लघुकं वस्त्रापणं विविधप्रवृत्तीनां केन्द्रमासीत्। तौ भ्रातरौ कुसीदकौ आस्ताम्। ग्रामाणां कृषीवलाः आगत्य शान्तिलालस्य पादयोः समीपे उपविशन्ति स्म। कृषीवलानां नैकाः आवश्यकताः शान्तिलालः अपूरयत्। पुत्र्याः विवाहः, मृतस्वजनस्य प्रेतभोजनम्, भगिन्याः कृते यौतुकधनम्, वृष्ट्यभावे बीजक्रयार्थं धनम्, कुटुम्बस्य विविधानि वस्त्राणि। अलंकारार्थं धनम्। एतत् सर्वं शान्तिलाल-मधुकान्तौ अददताम्। अतः वस्त्रापणमिषेण तौ वृद्ध्याजीविनौ (usurers) आस्ताम्। धनं द्विगुणितं चतुर्गुणितं च कर्तुं तयोः कला आसीत्। अन्ये वणिजः शान्तिलालं बहु मानयन्ति स्म। तेऽपि सर्वे मुग्धानां ग्रामजनानां वञ्चने प्रवीणाः। कृषीवलानां धान्यानि धान्यविक्रयधनं च वणिजां धनकोशे अगच्छत्। वणिजां लेखापुस्तकानि सदैव ऋणलेखाव्यवहारयुक्तानि आसन्। अकिञ्चनानां ऋणं न समाप्तिं गच्छति। न ते स्वक्षेत्रधान्येन समृद्धाः अभवन्।

शान्तिलालः सदैव निर्विरोधं ग्रामपंचायते ग्रामणीः भवति स्म। स एव माध्यमिकशालायाः संचालकमण्डले आसीत्।

वयं प्रतिपञ्चवर्षं अपश्याम यत् निर्वाचनसमये कांग्रेसदलस्य जीपयानम् आगच्छत्, किन्तु स्वपक्षप्रचारं अकृत्वा नेतृगणः शान्तिलालस्य गृहम् अगच्छत्। तत्र गुप्तमन्त्रणा भवति स्म। शान्तिलालः सर्वेषां प्रतिनिधि-भूत्वा निर्वाचनप्रत्याशिनः धनम् अलभत। अतः पश्चात् निर्वाचनकेन्द्रस्य समीपे वणिजः अतिष्ठन्। अपि च सर्वान् तस्मै प्रत्याशिने मतदानं कर्तुं ग्रामजनान् आदिशन्। इत्थं निर्वाचनविजयो लभ्यते स्म।

शान्तिलालः कुष्ठरोगी आसीत्। अयं कुष्ठरोगः तस्य कर्मणां फलमासीत् वा? मधुकान्तः निर्वंशः आसीत्। यथा वयं कथयामः तथैव ईश्वरः सर्वसाक्षी वर्तते। स एव नियन्त्रकः, किन्तु भारतस्य प्रतिग्रमं कति कति कुसीदिकाः सन्ति ? किं ते सर्वे पापानां फलं भुञ्जन्ति वा ? न जाने। अहं तु जाने यत् शताब्दीभ्यः श्रमं कृत्वाऽपि धान्योत्पादनं कृत्वाऽपि कृषीवलाः तथैव दरिद्राः सन्ति, यथा पूर्वकालेऽपि आसन्।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

# संस्कृत-वाङ्मये जनहित-भावः

❑ सोहनलाल शर्मा
पू. निदेशकः, संस्कृत शिक्षा-राजस्थानम्

संस्कृतभाषा सर्वभाषासु प्राचीनतमा, सुपरिष्कृता, सुललिता, विपुलशब्दविस्तरा, गीर्वाणभारती। चत्वारो वेदास्तद्व्याख्यानभूताः ब्राह्मणारण्यकोपनिषदः, शिक्षाकल्पव्याकरणादीनि वेदाङ्गानि, धनुर्वेदोऽथायुर्वेदः, षड्दर्शनानि, वास्तुसंगीत तर्कनीतिशास्त्राणि, स्मृति सूत्र तन्त्रग्रन्था, गणितं, वाल्मीकिप्रणीतं रामायणं, कृष्णद्वैपायनप्रणीतं महाभारतं, पुराणोपुराणानि, भास-कालिदास-भारवि-भवभूति-माघ-हर्षप्रभृतिभिः प्रणीतं ललितसाहित्यञ्चास्यामेव विलसति। अगाधोऽयं संस्कृतरत्नाकरस्तत्र बहूनि भास्वन्ति रत्नानि देदीप्यन्ते।

सैषा संस्कृतभाषा यस्यामेव च विश्वबन्धुत्व-सांस्कृतिकैक्यपरोपकार-राष्ट्रियैकता-परम्परासद्भाव-सर्वजनहितानाञ्च भावप्रवाहाः काव्येषु गद्येषु-कथासु-सुभाषितेषु-सूक्तिषु-नीतिवाक्येषु च संदृश्यन्ते। तत्र-जनहित-भावमवलम्ब्य कानिचिदुदाहरणानि निदर्शन-रूपेण प्रस्तूयन्ते।

परस्परं सम्मिल्य संलपेयुः संगच्छेयुस्तथा चास्माकं मन्त्रः, समितिः, मनः, हृदयञ्च समानाः स्युः-प्रकटितं सौमनस्यं प्रथमं ऋग्वेद मन्त्रेषु, निगूढश्चात्र सर्वजनहितभावः-

(i) **संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्। देवा भागं यथापूर्वे संजानानाउपासते।।**

(ii) **समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम्। समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि।।**

(iii) **समानी व आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति।।**

यजुर्वेद मन्त्रेषु मित्रस्य चक्षुषा सर्वतः समीक्षणं, भद्रं श्रवणदर्शनं, सर्वत्र शान्तिस्थापनं, शिव संकल्पनं सरलया गिरा चोद्घाटितम्-

(i) **दृते दृ ँ ह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे, मित्रस्य चक्षुषा समीक्षामहे।।**

(ii) **भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्ष-भिर्यजत्राः।**

(iii) **द्यौः शान्तिरन्तरिक्षꣳ शान्ति :- पृथिवीशान्ति-रापः शान्ति रोषध यः शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि।।**

(iv) **स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।(v) तन्मे नमः शिवसंकल्पमस्तु**

(vi) **भद्रं भद्रं न आभर।**

परस्परं सौहार्दं सांमनस्यमविद्वेषः च भवेत्, भ्रातरः स्वसारश्च कलिं विहाय मतैक्यं समानव्रतञ्चाङ्गीकृत्य ''अन्यो अन्यस्मै वल्गु वदन्त'' श्चरेयुरित्यथर्ववेदेऽपि -

(i) **सहृदयं सांमनस्यमविद्वेषं कृणोमि वः। अन्यो अन्यमभि हर्यत वत्सं जातमिवाध्न्या।।**

(ii) **मा भ्राता भ्रातरं द्विक्षन्मास्वसारमुत स्वसा। सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया।।**

(iii) **वाचा वदामि मधुमद् भूयासं मधुसद्दशः।।**

कामना ह्येषा - शिवं भवतु, मातृपित्रे, गोभ्यः, पुरुषेभ्यः, स्वस्तिरस्तु, चिरं सूर्यं पश्येम - **(i) स्वस्ति मात्रे पित्रे नो अस्तु, स्वस्ति गोभ्यो जगते पुरुषेभ्यः। विश्वं सुभूतं सुविदत्रं नो, अस्तु ज्योगेव दृशेम सूर्यम्।।**

उत शूद्र उतार्ये वा सर्वस्य प्रियं पश्यत-श्चलेयुरित्यपि-

**प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।**
**प्रियं सर्वस्य पश्यत उतशूद्र उतार्ये।।**

सर्वात्मदर्शनेन परं प्रति कुत्सा नोदेति। एतादृशः जनः सर्वं स्वस्मिन्, स्वञ्च सर्वेषु पश्यति- ईशावास्योपनिषदि-

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।**

धनं प्रत्यनासक्तिः, सर्वमीशावास्यमिदं जगद्यथा-

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम्।।**

**बृहदारण्यकोनिषदः** - ''असतो मा सद् गमय'', ''तमसो मा ज्योतिर्गमय'', ''मृत्योर्मामृतं गमय'', - बहून्येतादृशानि वाक्यानि सन्मार्गदर्शनाय सर्वकल्याणाय वा प्रथितान्येव।

द्वावेकीभूय वर्तेयातां, न हि परस्परं विद्वेषः स्यादिति कठोपनिषदः -

**शिक्षा - सह नाववतु, सह नौ भुनक्तु, सहवीर्यं करवावहै। तेजस्वि नावधीतमस्तु, मा विद्विषाव है।।**

अत्रैव च ''उत्तिष्ठत, जागृत, प्राप्य वरान्निबोधत'' इत्युद्बोधः सन्मार्गं दर्शयति। उपनिषत्स्वाध्यात्मिक-ज्ञानतत्त्व विवेचनेन सह सर्वजन हितसम्पादनस्य भावा-विशेषेण प्रतिपादिताः सन्ति।

इह लोके परत्र च मनसा-वाचा-कर्मणा प्राणिनामुपकाराय सदैव प्रयतितव्यमिति **विष्णु पुराणेऽप्युक्तम्-**

**प्राणिनामुपकाराय यथैवेह परत्र च।**
**मनसा कर्मणा वाचा तदेव मतिमान् भजेत्।।**

अत्रैव च परस्परं मित्रतायाः, प्राणिहितस्य, शुष्क वैर परित्यागस्य च भावाः द्रष्टव्याः-

**(i) मैत्री समस्त भूतेषु ब्राह्मणस्योत्तमं सुखम्।**

**(ii) सुशीलो भव धर्मात्मा मैत्रः प्राणिहिते रतः।**

**(iii) नारभेत कलिं प्राज्ञश्शुष्क वैरञ्च वर्जयेत्।**
**अप्यल्प हानिः सोढव्या वैरेणार्थगमं त्यजेत।।**

समस्त देहधारिणां पीडा मयि सम्पतेत्तथाऽहं च तेषां हृदि स्थितो भूत्वा दुःखक्षय-करो भवेयमिति राज्ञो रन्तिदेवस्योक्तिः बलाद् हृदयावर्जिका-श्रीमद्भागवत-महापुराणे - **आर्तिं प्रपद्येऽखिलदेहभाजां अन्तः स्थितो येन भवन्त्यदुःखाः।।**

तत्रैव च विश्वस्य स्वस्त्यये भूतानां शिवार्थञ्च प्रह्लादस्य याच्ञा -

**स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां**
**ध्यायन्तु भूतानि शिवं मिथो धिया।**
**मानश्च भद्रं भजतामधोक्षजे**
**आवेश्यतां मे मतिरप्यहैतुकी।।**

**मार्कण्डेयपुराणान्तर्गतायां** - दुर्गासप्तशत्यामपि शुभकरणार्थं नाशार्थञ्चाशुभस्य, विश्वपरिपालनाय, लोकरक्षणाय, सर्वोपकारकरणाय च दुर्गायाः स्तवनम्-

**(i) विदधातु शुभानि सा नः (ii) नाशाय चाशुभभयस्य मतिं करोतु। (iii) तां त्वां नताः स्म परिपालय देवि विश्वम्। (iv) प्रसीद विश्वेश्वरि पाहि विश्वम्। (v) रक्षणाय च लोकानाम्। (vi) देवि विश्वार्तिहारिणि (vii) वार्ता च सर्वजगतां परमार्तिहन्त्री। (viii) सर्वोपकारकरणाय सदार्द्रचित्ता। (ix) करोतु सा नः शुभहेतुरीश्वरी, शुभानि भद्राण्यभिहन्तु चापदः।**

महान्तः सुवर्णचन्दनेक्षुरसवत् परहितमावहन्ति। अपकारिणः प्रत्युपकारकर्तृणां दर्शनेन पापानि दूरतरं गच्छन्ति-यथा-शिवपुराणे-

**(i) महतां च स्वभावो हि परेषां हितमावहेत्।**
**सुवर्णं चन्दनं चेक्षुरसस्तत्र निदर्शनम्।।**

**(ii) अपकारेषु यश्चैव ह्युपकारं करोति च।**
**तस्य दर्शनमात्रेण पापं दूरतरं व्रजेत्।।**

सर्वे देहधारिणस्तुल्याः सन्ति-कष्टप्रदानेन सर्वे कष्टमनुभवन्ति। अतः कोऽपि जीवः कुत्रचित् न हन्तव्यः न क्लेशाः परं नृभिर्जीवदया कार्या-

**(i) सर्वे तनुभृतस्तुल्याः यदि बुद्ध्या विचार्यते।**
**इदं निश्चित्य केनापि नो हिंस्यः कोऽपि कुत्रचित्।।**

**(ii) धर्मो जीवदयातुल्यो न क्वाऽपि जगतीतले।**
**तस्मात्सर्वप्रयत्नेन कार्या जीवदया नृभिः।।**

भीतेभ्यः, व्याधितेभ्यः, विद्यार्थिभ्यः क्षुधातुरेभ्यश्च किं देयं-येन तेषां प्राणरक्षणं भवेत्-

**भीतेभ्यश्चाभयं देयं व्याधितेभ्यस्तथौषधम्।**
**देया विद्यार्थिनां विद्या देयमन्नं क्षुधातुरे।।**

परपीडनं न कर्त्तव्यं परपीडाप्रदायकः कदाचिदपि सुखं न लभते कथनमिदं **देवीभागवतपुराणस्य**-

**परोपतापनं कर्म न कर्तव्यं कदाचन।**
**न सुखं विन्दते प्राणी परपीडापरायणः।।**

जीवः केनाप्यपरेण कृतेन विपरीताचरणेन स्वात्मनि दुःखमनुभवति तथैव परात्मन्यपि विपरीतकरणेन दुःखं जायत एव। अहिंसकं नरं जन्तवः रक्षन्ति-हिंसकं बाधयन्ति च-**लिङ्गपुराणं** ब्रवीति-

**(i) आत्मवत् सर्वभूतानां हितायैव प्रवर्तनम्।**
**अहिंसैषा समाख्याता या चात्मज्ञानसिद्धिदा।।**

**(ii) मनसा कर्मणा वाचा सर्वदाहिंसकं नरम्।**
**रक्षन्ति जन्तवः सर्वे हिंसकं बाधयन्ति च।।**

ये मनसा-वाचा-कर्मणा सर्वभूतहितं समाचरन्ति तथा सर्वभूतेषु दयां कुर्वन्ति ते रुद्रलोकं गच्छन्ति। तथा च ये सर्वमुपकुर्वन्ति, तेभ्यश्चाभयञ्च ददति-ते शिवाराधन-फलं प्राप्नुवन्ति-यथा-

**(i) मनसा कर्मणा वाचा सर्वभूतहिते रताः।**
**दयादर्शितपन्थानो रुद्रलोकं व्रजन्ति च।।**

**(i) सर्वोपकारकरणं प्रदानमभयस्य च।**
**आराधनं तु देवस्याष्टमूर्तेर्न संशयः।।**

''यन्नेहास्ति न तत् क्वचित्'' ''भारतं पञ्चमो वेद'' इत्युक्ती महाभारतार्थे समीचीने स्तः। अत्र तु जीवनमूल्यानां सर्वेषां विषयाणां प्रतिपादनं वर्तते। यदि कश्चिद् मनसा-कर्मणा-वाचा पापं नाचरति स ब्रह्म सम्पद्यते-**(i) यदा न कुरुते पापं सर्वभूतेषु कर्हिचित्। मनसा कर्मणा वाचा ब्रह्म सम्पद्यते तदा।।**

सर्वेष्वात्मवत्वर्तितव्यं-यतो हि बन्धुस्तथा रिपुश्चास्माकमात्मैव भवति-

**(i) उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।**
**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।।**

**(ii) तथा च सर्वभूतेषु वर्तितव्यं यथात्मनि।**

''आत्मनः प्रतिकूलानि परेषां न समाचरेत्'' कथनेनानेन आत्मवत्वर्तितव्यमित्युपदेशः। अपरञ्चात्रैव ''निर्वैरः सर्वभूतेषु'' समः सर्वेषु भूतेषु वाक्यैरेवंप्रकारैः परस्परं निर्वैरस्यसर्वेषु समभावस्य चोपदेशः सर्वजनहितायैव।

महाभारतस्यांशभूता विदुरनीतिः सर्वभूतानां हितं सर्वार्थ सिद्धिमूलमात्मनश्च सुखावहं कथयति-

**हितं यत्सर्वभूतानामात्मनश्च सुखावहम्।**
**तत्कुर्यादीश्वरे ह्येतन्मूलं सर्वार्थसिद्धये।**

स एव पण्डितः प्रोक्तः यः परस्त्रियं, मातृवत्-परद्रव्यं लोष्टदृष्ट्या तथा सर्वभूतञ्चात्मवतपश्यति -

**मातृवत्परदारेषु परद्रव्येषु लोष्टवत्।**
**आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः।।**

**पञ्चतन्त्रेऽपि** श्लोकोऽयं किञ्चित् परिवर्तनेन सह समायाति-

**मातृवत्परदाराणि परद्रव्याणि लोष्टवत्।**
**आत्मवत्सर्वभूतेषु वीक्षन्ते धर्मबुद्धयः।।**

महाकविः कालिदासः स्वकीये विक्रमोर्वशीयमिति नाटके ''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः''

इत्यस्य भावपरिवर्तनेन सह स्वकीयं सर्वार्थं मङ्गलमाचरति –

**सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।**
**सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु।।**

**अभिज्ञान-शाकुन्तले** नाटके निदाघपरितापेन सन्तप्तः पादपः स्वनीचैः संश्रितानां जीवानां छायां प्रदाय तापं शमयति। प्रकृतिरपि परहित सम्पादने पृष्ठं नैव धावति, अग्रेसरा वर्तते –

**अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं,**
**शमयति परितापं छायया संश्रितानाम्।**

राज्ञः धर्मः प्रकृतिरञ्जनमुक्तम्। राजा सदैव प्रकृति- (प्रजा) हितरतो भूयादित्यप्युक्तम्-

**प्रवर्ततां प्रकृति हिताय पार्थिवः**
**सरस्वती श्रुति महती महीयताम्।।**

यथा फलभरेण वृक्षाः नमन्ति, यथा च सलिल-सम्पन्नाः घनाः नीचैरवलम्बन्ते तथैव समृद्धिभिरनुद्धताः सत्पुरुषाः स्वभावैनैव परोपकारिणः भवन्ति-

**भवन्ति नम्रास्तरवः फलोद्गमैः**
**नवाम्बुभिर्भूमि विलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः**
**स्वभाव एवैष परोपकारिणाम्।।**

परोपकारिणः स्वसुखं परित्यजन्ति, ते जगद्धितमेव कुर्वन्ति, परन्त्वेतादृशाः साधुपुरुषा भूतले विरलाः भवन्ति- तथा चोक्तम् –

**परोपकारैकधियः स्वसुखाय गतस्पृहाः।**
**जगद्धिताय जायन्ते विरलाः साधवो भुवि।।**

''परोपकाराय सतां विभूतयस्तथा'' परोपकारः पुण्याय पापाय परपीडन- मित्यप्युक्तम्। उत्तमपुरुषाणां सम्पदः परेषां विपन्निवारणार्थमेव भवन्तीति मेघदूते निगदितम्-आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्।

उत्तररामचरिते- जनाराधनस्य कृते स्नेहं-दयां-सौख्यं किं वा स्वप्रियां जानकीमपि परित्यजतः मे व्यथा न भविष्यतीति रामः ब्रवीति-

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।**

**किरातार्जुनीये** – परोपकारिणां महतां प्रवृत्तिः रुग्णे सत्यपि परोपकारपरा भवति-यथा- **युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपि प्रवृत्तिः।**

सज्जनस्तु स्वभावेनैव परोपकारपरस्तथा स्वस्याप्रियं कर्तुं व्यापृतेषु परेष्वप्युपकारपर एव दृश्यते- शिशुपाल वधे-

**( i ) उपकारपरः स्वभावतः सततं सर्वजनस्य सज्जनः।**
**( ii ) उपदेशपराः परेष्वपि स्वविनाशाभिमुखेषु साधवः।**

भट्टबाणस्य कादम्बर्याम्- ''प्राणपरित्यागेनापि रक्षणीयाः सुहृदसवः'' इत्यनेन-येनकेनापि प्रकारेण सुहृद्प्राणरक्षणं तथा दुखितमपि जनं रमयति सज्जन-समागमः सति दुःखेऽपि गृहे सज्जनागमनं मनः प्रीतिकरं भवतीति।

**हर्षस्य नागानन्देऽपि** ''स्वशरीरमपि परार्थे यः खलु दद्यादयाचितः कृपया'' इत्यनेन परार्थेऽयाचितमपि स्वशरीरसमर्पणं दानस्योदात्तभावं दर्शयति। सज्जनाः स्वभावेनैव परार्थं साधयन्तीति **नैषधीय चरिते**-

**''स्वत एव सतां परार्थता ग्रहणानां हि यथायथार्थता।''** यत्कार्यमात्मनः प्रतिकूलं तत्परस्यापि कृते प्रतिकूलं भवत्येवेति मत्वा तत्कार्यं न समाचरेदिति-मनुस्मृत्याम्-

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**

अन्यस्मिन्नपि श्लोके समानभावः प्रकटितः-

**एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना।**
**यः सर्वभूतेष्वात्मवत् व्यवहरति-स**
**'ब्रह्म' इति परं पदं प्राप्नोति।**

लघुचेतसामुदारचरितानाञ्च स्वभावे परस्परं वैपरीत्यम्। एकस्य हृदि निजापरयोर्भावस्तथापरस्य हृदि सर्वा वसुधैव कुटुम्बकमिति भावः। भारतीयोदात्तभावनां सांस्कृतिकैक्यं च दर्शयति- पञ्चतन्त्रम्।

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु ''वसुधैव-कुटुम्बकम्।।''**

**हितोपदेशस्तु**- कथामाध्यमेन हितमुपदिशति। यथा स्वकीयाः प्राणाः स्वस्य कृते प्रियाः सन्ति- तथैवान्येषामपि भूतानां प्राणाः तेषां कृते प्रियाः सन्ति। यथा च चन्द्रः स्वकीयां ज्योत्स्नां चाण्डालगृहात् नोपसंहरते- तथैव साधवः निर्गुणेष्वपि दयां कुर्वन्ति-

**प्राणा यथाऽऽत्मनोऽभीष्टा भूतानामपि ते तथा।**
**आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः।।**
**निर्गुणेष्वपि सत्वेषु दयां कुर्वन्ति साधवः।**
**न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः।।**

धनानि जीवनञ्चैकदा विनाशमुपयास्यन्ति, यदि परार्थे सन्निमित्ते तेषामुपयोगः स्यात्तदेतत्वरमित्युक्तम्-

**धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति।।**

सर्वविधः भावस्तत्रैवान्यस्मिन्नपि श्लोके कथितः-

**उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।**
**तडागोदरसंस्थानपरीवाह इवाऽऽम्भसाम्।।**

जगति को धर्मः ? कः स्नेहः? किं सौख्यमित्येतेषां प्रश्नानामुत्तरणि दया-सद्भावमरोगितादयः जनहितभावा एवं निरूषिताः यथा-

**को धर्मः ? भूतदया किं सौख्यं? नित्य मरोगिता जगति।**
**कः स्नेहः ? सद्भावः किं पाण्डित्यं ? परिच्छेदः।।**

**नीतिशतके - सर्वश्रेयस्करः पन्थाः सर्वभूतानुकम्पाया वर्णितः। तद्यथा-प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम्। तृष्णास्रोतो विभङ्गः गुरुषु च विनयः सर्वभूतानुकम्पा, सामान्यं सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः।।**

सत्पुरुषाः सूर्यचन्द्रजलधरवत् परहितसम्पादने कृताभियोगाः दृश्यन्ते- यथा-

**पद्माकरं दिनकरो विकचं करोति**
**चन्द्रो विकासयति कैरवचक्रवालम्।**
**नाम्यर्थितो जलधरोऽपि जलं ददाति**
**सन्तः स्वयं परहितेषु कृताभियोगाः।।**

**भामिनीविलासे** - परसुखस्य हेतोः स्वदेह-मर्पयन्तस्तरवः गुरव इव नमस्कृताः।-

**धत्ते भरं कुसुमपत्रफलावलीनां**
**घर्मव्यथां वहति शीतभवां रुजं च।**
**यो देहमर्पयति चान्यसुखस्य हेंतोः।**
**तस्मै वदान्यगुरवे तरवे नमोऽस्तु।।**

सज्जनाः पादपा इव परार्थाय फलन्तीति भगवतः व्यासस्यापि-कथनम्

**छायां कुर्वन्ति चान्यस्य तापं तिष्ठन्ति वातपे।**
**फलन्ति च परार्थाय पादपा इव सज्जनाः।।**

सर्वजनहिताय कृता सैषा मङ्गलकामना कदाचि-देवान्यत्र दृष्टुं प्रभवेद्यथा-

स्वस्ति प्रजाभ्यः, लोकाः समस्ताः सुखिनो भवन्तु, काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी, देशोऽयं क्षोभरहितः, सर्वे निरामयाः सन्तु, शिवमस्तु नित्यम्।

**''अद्वेष्टा सर्वभूतानां मैत्रः करुण एव चेति'' श्रीमद्भगवद्गीतायाः** स्वरस्तथा चान्ते-

**''सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेदिति।''**

**पंच भवनम्, मनोहरपुरम् ( जयपुरम् ) राज.**

पुस्तकसमीक्षा

❏ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# सर्जनात्मकसाहित्यस्याऽनुवाद-संग्रहः

यथा हि विश्वस्य विभिन्नासु भाषासु सर्जनात्मक-साहित्यस्य पारस्परिकानुवादस्य सुदीर्घा धारा बहोः कालात् प्रचलति तथैवास्माकममरभाषायां संस्कृतेऽपि विभिन्नानां भाषाणां सर्जनात्मकसाहित्यस्याऽनुवादो बहोः कालादनुवर्तते। शास्त्रीयवाङ्मयस्य (होराशास्त्रादेः) संस्कृतेऽनुवादस्तु सहस्राब्दीभ्यः क्रियमाणोऽस्त्येव, सर्जनात्मकसाहित्यस्य, काव्य-कथा-नाटकादेर-नुवादोऽपि वैदेशिकभाषाभ्यः संस्कृते क्रियमाणोऽस्ति, वाङ्ग-गुर्जर-तमिल प्रभृतिभारतीय-भाषाभ्योऽपि सुरुचिरोऽनुवादः क्रियमाणोऽस्तीति हर्षस्याऽपि विषयः, विस्मयस्याऽपि।

एवंविध एवैकोऽनुवादग्रन्थः सपद्येव प्रकाशमायातो यस्मिन् विविधभाषाभ्यः काव्यरचनानां कथानां च संस्कृतेऽनुवादो राजस्थानीयेन युवकविना डॉ. कौशल तिवारीत्याख्येन कृतः परिदृश्येत पाठकैः। युवक-विनाऽनेन हिन्दीभाषाया आधुनिकानां 11 कवीनां तादृश्यः काव्यरचनाश्छन्दोमुक्तशैल्यां तथैवाऽनूदिताः सन्ति यथा तैः प्राचां सरणीं विहाय सुतरामाधुनिकशैल्यां क्रान्तिकारिणो विचारास्तासु रचनास्वभिव्यक्ता अभूवन् याश्च रचना नूतनसरणीबद्धा अघोष्यन्त। एका सरणिरासीद् 'दलित' समर्थनस्य। तस्याः क्रान्तिकारि-विचाराणां कविः ओमप्रकाश वाल्मीकिः शम्बूकादिकथा आधृत्य विविधान् प्रहारान् रूढिवादिनामुपरि कुर्वाणोऽभूदिति हिन्दीसाहित्यस्या-धुनिकेतिहासवेत्तारो विदन्ति। तस्य चतसृणां काव्यरचनानां सरल-संस्कृतानुवादोऽत्रास्ति।

इत्थं 11 हिन्दीकवीनां 48 रचनानां संस्कृतानुवादः पूर्वार्धे मुद्रितोऽस्ति। अस्य पूर्वार्धस्य नामाऽस्ति ''एकादशी'' (एकादश कवीनां रचनाः)। सर्वा एता रचनाश्छन्दोमुक्तशैल्यां निबद्धा अभूवन्, तथैव चाऽनूदिताः। उत्तरार्धे विविधभाषानिबद्धानां विविध-प्रकृतिवाहिनीनां 39 कथानामनुवादोऽस्ति। अस्याभिधानं लेखकेन प्रत्तम् ''कथासङ्गमः'' इति। अत्र केवलं हिन्दी कथाकाराणां कथा एव न सन्त्यनूदिताः, वैदेशिकभाषा-कथाकाराणां कथा अपि सन्ति। एका बोधकथाऽस्ति, अपरा लोककथाऽस्ति। बोधकथा ग्रीकदेशीयदार्शनिकेन सोक्रेटीज इत्याख्येन (सुकरातेति प्रसिद्धेन) सम्बद्धा-ऽस्ति, लोककथा राजस्थानीयाऽस्ति।

उर्दुकथाकारस्य सआदत हसन मंटो इत्याख्यस्य ''टोबा टेकसिंह '' शीर्षकवहा कथा भारते उर्दू-हिन्दी-पाठकेषु लोकप्रियाऽभूत्, सुप्रथिता चाऽस्ति, यस्यां भारतविभाजनपृष्ठभूमिः परिदृश्यते। सर्वप्रथमं तस्या अनुवादोऽस्ति ''टोबाटेकसिंहम्।'' अन्यास्तिस्रः कथा अपि मण्टोमहोदयस्य सन्ति। प्रेमचन्द्रस्यैका कथा, हरिशंकर परसाई वर्यस्य सुप्रथितव्यंग्यकारस्य च तिस्रो रचनाः सन्त्यनूदिताः। एताः सन्ति मूल हिन्दीकथाः। इत्थमेव विश्वसाहित्येतिहासविदो विदन्ति यत् खलील जिब्रान नामकः अरबदेशीयः साहित्यकारः कथादि-रचनाकाररूपे सुप्रसिद्धोऽस्ति यः अमरीकादेशे निवासं कुर्वाणः न्यूयार्कनगरात् संग्रहणीयं साहित्यं प्रणिनाय यस्याऽनुवादः (आंगलभाषातः) प्रायः सर्वासु विश्व-भाषास्वक्रियत तत्तत्साहित्यकारैः। अस्मिन् संग्रहे

जिब्रानस्याऽपि पञ्चदश कथा अनूदिताः सन्ति। इत्थमेव चीन देशे प्रचलिता जेनकथाः (प्रमुखतो बौद्धदर्शनाऽऽधारिताः) संक्षिप्ताः किन्तु प्रभावकारिण्योऽभूवन्। ईदृशीनां 14 कथानामनुवादोऽप्यत्र मुद्रितः। समये समये संस्कृतपत्रिकासु प्रकाशिता एवंविधा अनुवादा अत्र सङ्कलिताः सन्ति (येषां स्रोतः सन्दर्भोऽप्यन्ते मुद्रितः)।

इत्थं काव्यरचनानामेकः पन्थाः, कथानामपरः पन्थाश्च पाठकान् कवितां कथां च पठितुं प्रेरयेदिति विचार्यानुवादकेन संग्रहस्याऽस्य शीर्षकं निर्धारितं ''द्विपथम्'' इति। अनुवाद-जगतः सोऽयमुल्लेखनीयः सङ्कलनग्रन्थः संस्कृतपाठकानां कृते सुतरां रुचिकरः सिध्येदिति विश्वसिमः।

**द्विपथक्षम्ः अनुवादकः डॉ. कौशल तिवारी, प्रकाशकः कौशल तिवारी, मालादेवी मोहल्ला, वार्ड नं. 31, बारां राजस्थान पृ.सं. 102 मू. 250/-.**

## संस्कृतमहिमप्रख्यापको ग्रन्थः

विश्वस्य प्राचीनतमायाः, समृद्धतमाया, ललिततमायाश्च संस्कृतभाषाया महिमा विविधतया प्रतिपादयितुं शक्यते, प्रतिपादितश्चायं बहुभिर्बहुविधाभिः। प्रायः शताब्दी-चतुष्टयात् प्राक् शार्मण्यदेशीयैः गेटे प्रभृतिभि, आङ्गलैर्विलियम जोन्स प्रभृतिभिः संस्कृतवाङ्मयस्य प्राशस्त्यं प्रशंसितमासीत्। भारते त्वस्य महिमा सुविदित एव। संविधाने 351 तमेऽनुच्छेदे स्पष्टतया प्राप्यत एव यद्भारते राजभाषायाः शब्दावली प्रमुखतया संस्कृत-भाषातः परिग्रहीष्यते इति स्पष्टमादिष्टम्।

इत्थं संस्कृतस्य महिमा कदा कैः कैर्मनीषिभिः कथमुपवर्णित इति विषयमादाय प्रणीत एको ग्रन्थः सपद्येव प्रकाशमाप्त इति विज्ञाय प्रसीदेयुः संस्कृत सेविनः। उत्तरप्रदेशीये सुलतानपुरस्य कादीपुरोपनगरे निवसता ''कौण्डिन्य'' ''अगस्त्य'' प्रभृति हिन्दीकाव्य-प्रणेत्रा डॉ. सुशीलकुमारपाण्डेयेन ''साहित्येन्दु'' इत्युपाह्वधारिणा प्रणीतोऽयं ग्रन्थः समये समये पत्र-पत्रिकासु प्रकाशितान् लेखकस्य विचारान्, समये समये वैदेशिकैर्विद्वद्भिः प्रकटितानुद्गारान्, समये-समये न्यायाधिपतिभिः संस्कृतस्य पक्षे समुद्घोषितान् निर्णयान् विचारांश्च संकलय्य प्रस्तौति।

एकस्मिन् निबन्धे विदेशेषु संस्कृतपाठनस्य सूचनाऽस्ति, अपरस्मिन् प्रयागोच्चन्यायालयेन संस्कृते पारिता निर्णयाः सूचिताः सन्ति, सर्वोच्चन्यायालयस्य संस्कृतपक्षपोषका निर्णयाश्चापि सूचिताः सन्ति। भारतीय-मनीषिणां दृष्टौ संस्कृतस्य किं महत्त्वमस्तीति वर्णयति निबन्धे महात्मागांधि-डॉ. राधाकृष्णन्-सुभाषचन्द्र बोस प्रभृतीनां विचारा उल्लिखिताः सन्ति। स्वातन्त्र्यसेनानी चन्द्रशेखर आजादस्तु संस्कृत-पाठशालाया एव छात्रोऽभूदिति सुविदितमेव।

ग्रन्थेऽस्मिन् योग-स्वास्थ्य-मोक्षादिप्रेरकं साहित्यं कुत्र संस्कृते समुपलभ्यते इत्यादि सूचयन्तोऽन्येषां विदुषां लेखा अपि संगृहीताः सन्ति। ग्रन्थस्यास्य विशेषोऽस्ति संस्कृतस्य राजभाषात्वविषये प्रस्तुतेरितिहासस्तद्-विषयेऽद्यतनं करणीयं चेति। यदा भारतस्य राजभाषा-विषये संविधानसभा विचारयतिस्म तदा (10 सितंबर 1949 ई.) डॉ. भीमराव आम्बेडकरवर्येण संस्कृतस्य राजभाषात्वं प्रस्तावितमासीदित्यपि सूचितमस्ति, 2011 ई. वर्षे उत्तराखण्डराज्येन संस्कृतस्य द्वितीयराजभाषात्वं घोषितमासीदित्यपि। तदिदमुद्धृत्य उत्तरप्रदेशराज्य-मुख्यमन्त्रिसविधेऽपि प्रार्थना प्रस्तुताऽस्ति यत्तत्र संस्कृतस्य तृतीयराजभाषात्वं स्वीक्रियेतेति (हिन्दी

राजभाषाऽस्ति, उर्दू द्वितीय राजभाषा घोषिताऽस्ति)। एवंविधानुरोधपराणि पत्राण्यप्यत्र मुद्रितानि। प्रारम्भे मुद्रितेषु शुभाकांक्षासन्देशेषु देवर्षिकलानाथशास्त्रिणः पुरोवाचि तादृश्योऽपि सूचनाः सन्ति यद् देशे कुत्र संस्कृतविश्वविद्यालयाः सन्ति, संस्कृतवाङ्मयस्य कृते कतिविधाः, पुरस्काराः सम्मानादिकं च निर्धारितमस्ति, पत्रपत्रिकादिसाहित्यं, जनसंचारमाध्यमसुविधाश्च संस्कृते कीदृश्यः समुपलब्धा इत्यादि।

ग्रन्थस्यास्य भाषा सामान्यतो हिन्दीभाषाऽस्ति, कतिपयपत्राणि संस्कृते मुद्रितानि। संस्कृतसेविनां कृते बहुमूल्यसूचनाप्रदा सामग्री मुद्रिताऽत्रेति वीक्ष्यास्य समीक्षाऽत्र समुपह्रियते।

**मनीषियों की दृष्टि में संस्कृतः प्रणेता डॉ. सुशीलकुमार पाण्डेय ''साहित्येन्दु'', प्रका. कौण्डिन्य साहित्य सेवा समिति, पटेलनगर, कादीपुर, सुलतानपुर उ. प्र. पृ.सं. 216, मू. 300/-**

# पिता

❑ **डॉ. हर्षदेवमाधवः**

भवतो मुखं
नीहारच्छन्नं स्मर्यते
कदाचित्,
यतो हि
भवान् निर्गतः
कुलाये शावकं त्यक्त्वा
गगनपारम्।
प्रमाणपत्रेषु
भवतो नाम्ना ऋते
न स्मृतं नामापि।
अतः पुस्तकेषु, वार्तालापेषु
व्यवहारेषु
पितेति शब्दं श्रुत्वा
हृदये शिशिरकाननरिक्तताम्
अन्वभवम्...........।
भवतोऽभावो दृष्टो मया
मातुः करुणार्द्रयोर्नेत्रयोः,
सम्बन्धिनां शीतोपेक्षायाम्,
गृहस्याकिञ्चनत्वे,
क्रीडनकानां क्रयकाले,
छायारहिते मस्तके.....
सान्त्वनाशून्येषु दुःखेषु
क्रीडनकानां भग्नावस्थासु,
उत्सवानां विधुरक्षणेषु।
पुस्तकेषु
पठनेनैव ज्ञातः पितृस्नेहः।
अतीतकथास्वेव
अनुमितो भवतः प्रभावः।
कदाचिद्
क्षतेषु रुधिरं वहति
तदा
पश्यामि
भवतोऽस्तित्वं
यदस्ति मौनम्-
साक्षिभूतं ममास्तित्वस्य।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- **पञ्चत्रिंशः प्रसङ्गः**

# अनुशासनपालनम्

**( गताङ्कादग्रे )**

❑ वेणीमाधव गो. धर्माधिकारी

स्वतन्त्रतान्दोलनस्य तेषु दिवसेषु स्वदेशीप्रचारादिषु स्वयंसेवकाः वयं सर्वेऽपि कार्यरता आस्म। बाबामहोदयाः स्वयमेव कार्पासतूलिकाः समानीय चक्रिकया सूत्रनिर्माणं कुर्वन्तिस्म। तेषु दिनेषु आंग्लशासनस्य वायुमण्डले आरक्षिदलस्य गुप्तचर-विभागस्य च कार्यकलापस्तीव्रतर आसीत्। बाबा-महोदयैः स्वकूर्चवर्द्धनं कृतमासीत्। कूर्चवर्द्धनस्य वास्तविकं कारणं तु न तैः कस्मै अपि कथितम्। तेषां पितृचरणानामपि कूर्चं लम्बमासीदतोऽयं विचारः समायातः स्यादथवा लम्बमानकूर्चस्य व्यक्तित्वे वैशिष्ट्यमिति विचारः स्यात्तथाच कूर्चक्षौरस्य दैनिककार्यान्मुक्तिरेवास्य कारणं भवेन्नाम किमपि भवतु कूर्चवर्द्धनं कृतमासीत्। पूजनीयेभ्यो डाक्तरमहोदयेभ्य एवं कूर्चवर्द्धनं न रोचतेस्म। तेषामभिलाषासीत्स्वयं-सेवकस्य हृदये तु देशभक्तेर्ज्वाला प्रज्वलिता स्यात् परं बाह्यस्वरूपे समाजबन्धुभिः समानैव स्थितिर्भवेत्। स्वसमाजबन्धुभिः पृथक् प्रदर्शनात्मिका प्रवृत्तिस्तेभ्यो न रोचते स्म। कूर्चवर्द्धनाद् व्यक्तिः दूरत एव विशिष्टः प्रतिभाति। संगठनकार्यायेदं बाधकं प्रतिभाति। एतेनाकारणमेव संघविरोधिनः सर्वकारस्य ध्यानाकर्षणं भवति।

परमथापि डाक्तरमहोदयानां कार्यशैल्यां सहसा-कमपि किमपि कथनं नासीदेव ते प्रत्येकस्मिन्नेतादृशं कार्यं संशोधितुमवसरं प्रतीक्षन्तेस्म। अन्ते एतादृशोऽवसरः सम्प्राप्त एव। शाखायाः विजयादशमी-महोत्सवः समागतः, उत्सवस्य सज्जा प्रारब्धा। एकस्मिन् दिने डाक्तरमहोदयाः बाबामहोदयमकथयन्किम् आप्टे! विजयादशम्यां गणवेशे उपस्थिति भविष्यति न वा ? बाबामहोदयाः सहसैवं प्रश्ने विस्मिताः। तेषां स्वीकृतौ डाक्तरमहोदया अवदन्-परं कूर्चक्षौरं विधेयं भविष्यति। गणवेशे कूर्चं नैव चलिष्यति। तेषु दिनेषु गणवेशनिरीक्षणे कूर्चक्षौरस्यापि निरीक्षणं भवतिस्म।

परमथापि बाबामहोदयानां कूर्चक्षौरे रुचिर्नासीत्। एतत्तु सर्वविदितं यदाप्टेमहोदयानां स्वभाव एवाग्रह आसीत्। विजयादशमीमहोत्सवः समागतः नागपुर-शाखायां प्रारम्भत एवोत्सवोऽयं दिनद्वयात्मकः। प्रथमदिने सायं शस्त्रपूजनकार्यक्रमः अग्रिमे दिने च प्रातः सीमोल्लङ्घनार्थे पथसंचालनात्मकः कार्यक्रमः भवति। आप्टेमहोदयाः प्रथमदिनस्य कार्यक्रमे यदोपस्थिताः तदा कूर्चक्षौरं नैव कृतमासीत्। प्रथमदिनस्य कार्यक्रम समाप्तौ डाक्तरमहोदयाः मामवदन्-कृष्ण! अधुना कथम्? चेदाप्टेमहोदयैः क्षौरं न कृतं प्रातः गणवेशे कार्यक्रमे सम्मिलितुं नैव शक्ष्यन्ति। मया कथितम्-द्रक्ष्यामः। अधुना केवलं रात्रिरेवावशिष्टा। रात्रिः संजाता, वयं सर्वे घोषविभागस्य वस्तूनां स्वच्छतायां संलग्ना आस्म। स्व-स्वगणवेशसज्जीकरणे एव रात्रिर्व्यतीता भवतिस्म। प्रायस्त्रिवादनसमये बाबामहोदयाः अवदन्-कूर्चक्षौर-मपि करणीयं भविष्यति। तेषु दिवसेषु गणवेशसज्जार्थं कार्यालयसमीपे एवैको नापितो यावद्रात्रिं स्वापण-मुद्घाटयति स्म। किं भूयः माधवनापितेन विद्युत्प्रकाश एव बाबामहोदयानां कूर्चक्षौरं विहितम्। स्नानादिकं विधाय गणवेशं परिधाय ते कार्यक्रमे सम्मिलिता अभवन्। प्रातः काले संघस्थाने स्वयं डाक्तरमहोदयाः स्वयंसेवकानां गणवेशनिरीक्षणं कुर्वन्ति स्म। स्वयं-

सेवकाः पङ्क्तिषु स्थिता आसन्, द्राक्तरमहोदयाश्चा-शुगत्या गणवेशनिरीक्षणं कुर्वन्त आसन्। यदा निरीक्षणं पूर्णमभवत् ते मामवदन् सत्यमेव बाबामहोदयाः नोपस्थिताः। कृतक्षौरं गौरवर्णं तरुणं प्रति संकेतं कुर्वता मया कथितम्-कथं नोपस्थिताः ते सन्ति तु। द्राक्तर-महोदयास्तानवलोक्य सस्मिता अभवन्।

बहूदिनेभ्यस्तान् सकूर्चानवलोकनेन अद्य सहसा तेषां कूर्चरहितं स्वरूपं सर्वेषु स्वयंसेवकेषु स्थितं पृथगवलोकनं कर्त्तुं कठिनमेवासीत्। संभवतोऽत एव तेषामुपस्थितेर्ज्ञानं नाभवत्। यत्किमपि भवतु अनुशासनपालनेन तस्मिन् समये यत्कूर्चक्षौरमभवत् तन्न पुनः प्रवृद्धम्।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **चतुःषष्टितमः प्रसङ्गः**

# दीनदयालुता

❑ **श्रीमती आराधना धर्माधिकारी**

एवं तु सर्वेषां राष्ट्राणां नववर्षदिवसाः प्रायेण पृथक्-पृथक् भवन्ति परमन्ताराष्ट्रियरूपेण जनवरी-मासस्य प्रथम दिनाङ्केऽपि सर्वत्र नववर्षोत्सवः क्रियते। यथा-यथा दिसम्बरमासस्यैकत्रिंशे दिनाङ्के सन्ध्या समयः प्रसर्पन् गच्छतिस्म भवनेषु प्रासादेषु भोजनालयेषु च विद्युन्मालाः प्रदीप्ताः भवन्ति स्म। क्षुद्राः क्षुद्राः विद्युद्दीपाः अन्धकारेण संघर्षं कर्त्तुमुद्यताः। किञ्चित्क्षणानन्तरमेवान्धकारः पराजयं स्वीकृत्य भवनेभ्यो राजमार्गेभ्यश्च पलायितः। प्रकाशस्यसहयोगं प्राप्य संगीतमपि मदमयं सम्भूय नववर्षागमन-प्रसादेनोन्मत्तान् जनानाकर्षयतिस्म। मदपानं नृत्यं गानं शिखरारूढमासीत्। द्वादशवादनात्क्षणद्वयपूर्वमेव विद्युत्प्रकाशः समाप्तः सर्वत्रान्धकारः संव्याप्तः। भोजनालयेभ्यो बहिर्मार्गे किंचिद्दूरे दीनानामेकं यूथमुच्छिष्टस्यापेक्षायां निलीनमासीत्। अधुना यूथस्य हृदये प्रकाशः संजातः द्वादशवादनघण्टानादे एव आवासेषु ''हेप्पी न्यू ईयर'' ध्वनिपूर्वकः कोलाहलः संजातस्तेन सहैव सप्तवर्णानां विद्युद्दीपानां प्रकाशोऽपि नृत्यन्नासीत्।

नववर्षोत्सवः समाप्त आसीत्। एकस्मिन् भवने यदा शून्यता संव्याप्तासीत्तदा तद्यूथं स्वोदरबुभुक्षां शान्तयितुं बहिः स्थितेष्ववकरपात्रेषु उच्छिष्टमन्वेष्टुं प्रधाव्य समागतं परं समीपमागतेऽवकरपात्राणि रिक्तान्येव समुपलभ्य तस्याशायां तुषारपातः संजातः। सर्वे नैराश्यमनुभवन्तः प्रत्यावर्त्तनार्थमुद्यताः तदैव ''तिष्ठन्तु यूयं सर्वे'' प्रहरिणो वचनं श्रुत्वा भीतास्ते तमवालोकयन्। समीपमागत्य द्वारपालेन कथितम्-सर्वे अन्तरागच्छन्तु प्रबन्धक आह्वयति। भीतभीतास्तेऽन्तः प्रविष्टाः, प्रबन्धकेन मंचेषूपवेष्टुं कथयित्वा स्थालीषु भोजनमानेतुमादेशः कृतः। ते विस्मयेन प्रबन्धकं पश्यन्तोऽवदन् महाशय नास्त्यस्मत्समीपे मूल्यम्। मूल्यं कः याचते ? यूयं सर्वे पूर्णोदरं भक्षयन्तु नववर्षोत्सवं च साधयन्तु। अहन्तु तेषां सर्वेषां ग्राहकाणामाभार्यस्मि यैर्भित्तिकासु लिखिता मे प्रार्थना पठिता, स्वीकृता गुणिता च। यूथस्य सर्वैर्जनैरवलोकितं भित्तिकासु स्थूलाक्षरेषु लिखित-मासीत्-समागतेभ्यः सर्वेभ्योऽभ्यागतेभ्यो निवेदनमस्ति स्थाल्यां तावदेवान्नं ग्रहीतव्यं यावद् भक्षयितुं शक्यं स्याद्येनावशिष्टमनुच्छिष्टमेव दीनेभ्यो दातुं शक्यं स्यात्। ते अचिन्तयन्-अस्मादृशानां मन्दानां कृते केनापि तु विचारः कृतः। नववर्षोत्सवः सम्यक्संजातः।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

श्रीकृष्णदेवरायः षोडशशताब्द्यां विजयनगरस्य तुलुववंशीयस्य श्रीनृसिंहदेवस्य पुत्र आसीत्। अस्य मातुः नाम 'नागलाइ' इत्यासीत्। श्रीकृष्णदेवरायः अतिप्रभावशाली नृपतिरासीत्। राज्यप्राप्तेरनन्तरमपि सः नित्यं ब्राह्ममुहूर्ते उत्थाय पूर्णतत्परतया व्यायामादिकं करोति स्म। महाराजाधिराजः सिंहासनाधीश्वरः इत्युपाधिनाऽस्य नामोद्घोषो भवति स्म। रायचूरनगरस्य समीपं तेन मुहम्मदीय-शासकस्य इस्माइलआदिलशाहस्य एतादृशो घोरः पराभवः कृतो यत् तदनन्तरं मुहम्मदीयं शासनं दक्षिणप्रदेशे पराभूतमभूत्। तेन अनेकानि लोकोपकारकाणि कार्याणि सम्पादितानि येन अस्य श्रीकृष्णदेवरायस्य कीर्तिः सर्वत्र व्याप्ताऽभूत्।

हर्षवर्धनः - सप्तम्यां शताब्द्यां हूणाख्यानां विदेशीयानां आक्रामकाणां पराजयकर्तुः श्रीप्रभा-करवर्धनस्य सुपुत्र एषः श्रीहर्षवर्धन आसीत्। अस्य ज्येष्ठभ्राता श्रीराज्यवर्धन आसीत्, तेनाऽपि हूणैः सह संग्रामः कृतः। श्रीराज्यवर्धनस्य परलोकगमनानन्तरं श्रीहर्षवर्धनः सिंहासनारूढोऽभूत्। राज्याभिषेकस्य पञ्चषड्वर्षानन्तरमेव तेन समस्ते उत्तरभारते स्वस्याधिपत्यं स्थापितम्। कन्नौजनगरं तस्य पाटनगरमासीत्। प्रसिद्धो चीनीयात्री ह्वेनसांग श्रीहर्षवर्धनस्य समीपे निवासं कृतवान् तेन स्वप्रवासवृत्ते श्रीहर्षस्य राज्यवैभवस्य उत्कृष्टं विवरणं लिखितम्। राज्यारोहणानन्तरं कतिपय-वर्षपर्यन्तं स ''परममाहेश्वरः'' अर्थात् शैवमता-वलम्बी आसीत्। तदनन्तरं बौद्धमतं प्रति तस्य हृदये आत्मीयता उद्बुद्धाऽभूत्। सर्वान् धर्म-सम्प्रदायान् प्रति तस्यान्तःकरणे समभाव आसीत्। सः नालन्दाविश्वविद्यालस्य कुलपतिः आसीत्। अस्य विश्वविद्यालस्य कृते तेन ग्रामशतस्य दानं कृतम्। अन्येषां विश्वविद्यालयानामपि स आसीदाश्रयदाता। सः स्वयं विद्वान् 'साहित्यिकः' प्रत्येकपञ्चवर्षात्मक-स्य कालखण्डस्यानन्तरं तेन एतादृशः महासमारोहः सम्पादितो यस्मिन् तेन स्वस्य सम्पूर्णं द्रव्यं वितीर्णम्। अनेनैव कारणेन तस्य नाम 'प्रदाता' इति विशेषणेन विभूषितमभूत्।

साधुः शंकरदेवस्य तथा सायणमाधवौ।
प्रतापः शिवराजश्च गोविन्दो वसवेश्वरः।।

श्रीशंकरदेवः - असमप्रदेशं पुरातनकाले कामरूपदेश इतिनाम्ना कथयन्ति स्म, प्राग्ज्योतिष-पुरमिति चापि वदन्ति स्म। महाभारते भगवन्तं कामरूपदेशस्य अधिपतिमवदत् व्यासः। त्रयोदशशतके ब्रह्मदेशतः आदमजातीयाः अत्रागत्य न्यवसन् तैरत्र राज्याधिकारः प्राप्तः। अतः आदमनामैवापभ्रंशं भूत्वा असम इति प्रसिद्धिं जगाम।

असमप्रान्ते कायस्थजातौ कुसुम्बरानामकः एकः सहृदयो जन अभूत्। स महान् शिवभक्त आसीत्। शंकरस्य भगवतः कृपया सोऽयं महाभागः ईशवीये 1449 अब्दे एकं सुरूपं सुलक्षणं च पुत्रं प्राप्तवान्। तेन तस्य नाम शङ्कर इति स्थापितम्। शङ्करो महाप्रतिभासम्पन्नो बालक आसीत्। शैशव एव स्वीयैर्गुणैः निकटस्थितेषु ग्रामेषु प्रसिद्धिमापेदे। स्वल्प एव काले स्वस्य तीव्रबुद्ध्या शास्त्राणि समभ्यस्य शंकरदेवे गुरुं गुरुदक्षिणाभिः संतोष्य प्रस्थानं चक्रे।

ततः सः योगसाधने व्यस्तोऽभवत्। निरन्तरा-भ्यासेन योगेऽपि तस्य प्रगतिः प्रशंसनीया बभूव। स

काश्चन सिद्धीरवाप्तवान्। परन्तु तस्यात्मतुष्टिर्न बभूव। ततः स योगाभ्यासं त्यक्त्वा भगवद्गीता-दिवेदान्तशास्त्रानुशीलने समसज्जत्। तस्यात्मचिन्तनं बृद्धिमाप। तदनन्तरं च विश्वासमाप यत् कृष्णभक्तिर्हि जीवस्य परमा गतिः। अतः परं तस्य चित्तं भक्तिस्रोतसि निमग्नमभवत्। स कृष्ण-भक्तिमेवोपदिदेश। तस्य उपास्यदेवः द्विभुजो मुरलीधरो भगवान् श्रीकृष्ण आसीत्।

सर्वतः तस्य ख्यातिरभूत्। लोकाश्च तस्य शिष्यत्वं प्रपन्ना भक्तिरसास्वादनं कर्तुमारब्धवन्तः। चतुस्त्रिंशद्वर्षात्मके वयसि स तीर्थपर्यटनम् प्रारेभे। काशीं गयां वृन्दावनं मथुरां वदरिकाश्रमं-द्वारकारामेश्वरादिकं दृष्ट्वा अनेकैर्विद्वभिः शास्त्रा-लोचनं कुर्वन् गृहं प्रत्याजगाम।

एकदा तस्य माधवनामकेन पण्डितेन समागमः संवृत्तः। स हि माधवः शाक्त आसीत्। शंकरेण सह तस्य शास्त्रार्थोऽभूत्। तत्र स श्रीभागवतीयं पद्यमिदं वदन्नुवाच यत् वृक्षस्य मूलसेचनेन यथा सर्वाः शाखाः हरिता भवन्ति तद्वत् भगवतः श्रीकृष्णस्य भक्तिकरणेनैव सर्वे देवास्तुष्यन्ति इति। शंकरदेवस्य प्रभावे माधवोपरि सम्यगभूत् येन स वैष्णवीं दीक्षां शंकरदेवात् एव जग्राह। अतः परं दामोदरनामा कश्चित् ब्राह्मणः तस्य शिष्योऽभूत्। दामोदरो वैष्णवधर्मस्य प्रचारं प्रारब्धवान्। हरिदेवनामा कश्चन अन्यो विद्वान् ब्राह्मणः शंकरदेवस्य शिष्यतां गृहीत्वा असमप्रान्ते कृष्णभक्तिं प्रसारयामास। इत्थं शंकरेण तच्छिष्यैश्च असमप्रान्तीया भूमिः कृष्णभक्तिरसेना-प्लाविता कृता।

ततः परं शंकरदेवः द्वितीयवारं स्वशिष्यैः साकं तीर्थयात्रार्थं जगाम दक्षिणदेशस्यानेकेषां तीर्थानां दर्शनं कृत्वा तत्र तत्र श्रीकृष्णभक्तिमातन्वानः जगदीशपुर्यामाजगाम। तत्र तेषां चैतन्यमहाप्रभुणा सह समागमो संवृत्तः। कतिचिद्दिनानि पूर्यां निवासं कृत्वा श्रीचैतन्यमहाप्रभुसमागमलाभं गृहीत्वा स स्वशिष्यमण्डलेन समम् असमप्रान्तं प्रत्याययौ। कूचविहारस्य महाराजेन तस्य साक्षात्कारः जातः 120 विंशत्यधिकशतवर्षवयस्कः श्रीशंकरदेवः असम-वैष्णवसम्प्रदायप्रवर्तकः महान् भक्तः संसार-लीलां परिसमाप्य तद्विष्णोः परमं पदं प्राप्तवान्।

अतः परम् एतस्य सम्प्रदायस्य रूपद्वयं प्रावर्तत। माधवस्यानुयायिनो महापुरुषीयाः वैष्णवाः, दामोदरानुयायिनो दामोदरीया वैष्णवाश्च इति प्रसिद्धिं प्राप्तवन्तः। हरिदेवः श्रीशंकरस्य पुत्रोऽपि एकं सम्प्रदायमचालयत्, यो हरिदेवीयसम्प्रदाय इति नाम्ना प्रथितोऽभूत्।

## हिन्दी में

**श्रीकृष्णदेवराय**- ये श्रीकृष्णदेवराय सोलहवीं शताब्दी में विजयनगर के तुलुववंशीय श्रीनृसिंहदेव के पुत्र थे। इनकी माता का नाम 'नागलाई' यह था। श्रीकृष्णदेवराय अत्यन्त प्रभावी राजा थे। राज्य प्राप्ति के पश्चात् भी वे नित्य ब्राह्ममुहूर्त में उठकर पूर्ण तत्परता से व्यायाम आदि करते थे। 'महाराजाधिराज सिंहासनाधीश्वर' इस उपाधि से इनका नामोद्घोष होता था। रायचूर नगर के समीप इन्होंने मुहम्मदीय शासक इस्माइल आदिलशाह का ऐसा घोर पराभव किया जिससे इसके पश्चात् मुहम्मदीय शासन दक्षिणप्रदेश में पराभूत हो गया। इन्होंने अनेक लोकोपकारक कार्य सम्पादित किए जिससे इन श्रीकृष्णदेवराय की कीर्ति सब जगह फैल गई।

**हर्षवर्धनः**- सातवीं शताब्दी में हूण नाम के विदेशी आक्रामकों का पराजय करने वाले प्रभाकरवर्धन के सुपुत्र ये श्रीहर्षवर्धन थे। इनके बड़े भाई श्रीराज्यवर्धन थे, उन्होंने भी हूणों के साथ संग्राम किया। श्रीराज्यवर्धन के

मरने के पश्चात् श्रीहर्षवर्धन सिंहासनारूढ हुए। राज्याभिषेक के पांच छः वर्षों के पश्चात् उन्होंने समस्त उत्तर भारत पर अपना आधिपत्य प्रस्थापित कर लिया। कन्नौज नगर उनकी राजधानी थी। प्रसिद्ध चीनी यात्री ह्वेनसांग श्रीहर्षवर्धन के समीप रहे थे। उसने अपने प्रवासवृत्त में श्रीहर्ष के राज्यवैभव का उत्कृष्ट विवरण लिखा है। राज्यारोहण के पश्चात् कुछ वर्ष तक वे 'परममाहेश्वर' अर्थात् शैवमतावलम्बी थे। तदनन्तर बौद्ध मत के प्रति उनके हृदय में आत्मीयता हो गई। सारे धर्म सम्प्रदायों के प्रति उनके अन्तः करण में समभाव था। वे नालन्दा विश्वविद्यालय के कुलपति थे। इस विश्वविद्यालय को उन्होंने सौ ग्राम दान में दिये थे। अन्य विश्वविद्यालयों के भी वे आश्रय दाता थे। वे स्वयं विद्वान्, साहित्यिक और कलाकार थे। प्रत्येक पांच वर्ष के कालखण्ड के पश्चात् वे ऐसा महान् समारोह सम्पन्न करते थे जिसमें वे अपना सम्पूर्ण द्रव्य निर्धन लोगों में प्रदान करते थे। इसी कारण उनका नाम 'प्रदाता' इस विशेषण से अलंकृत होता था।

**श्रीशङ्करदेव** – असमप्रदेश पुरातनकाल में कामरूप देश कहलाता था। प्रागज्योतिषपुर भी इसको कहते थे। महाभारत में व्यास ने भगवान् को कामरूप का अधिपति कहा है। तेरहवीं शताब्दी में ब्रह्मदेश से आदम जाति के लोग यहां आकर बसे और उन्होंने यहां राज्य किया। अतः आदम नाम का अपभ्रंश होकर असम इस प्रसिद्धि को प्राप्त हो गया।

असम प्रान्त में कायस्थ जाति में कुसुम्बरा नाम का एक सहृदय व्यक्ति हुआ। वे महान् शिवभक्त थे शङ्कर भगवान् की कृपा से इस महाभाग को ईशवीय 1449 के वर्ष में एक रूपवान् और सुलक्षणों वाला पुत्र हुआ। उन्होंने इसका नाम शङ्कर ही रखा। शङ्कर महान् प्रतिभासम्पन्न बालक था। शैशवकाल में ही अपने गुणों से निकट के ग्रामों में वह प्रसिद्ध हो गया। थोड़े समय में ही अपनी तीव्र बुद्धि के द्वारा शङ्करदेव शास्त्रों को ठीक प्रकार से पढ़कर गुरु को गुरु दक्षिणा द्वारा सन्तुष्ट करके वे चले आये।

इसके पश्चात् ये योगसाधन में व्यस्त हुए। निरन्तर अभ्यास से योग में भी उनकी प्रगति प्रशंसनीय हुई। उन्होंने कई सिद्धि भी प्राप्त की। किन्तु उनको आत्मतुष्टि नहीं हुई। इसके पश्चात् वे योगाभ्यास छोड़कर भगवद् गीता और वेदान्त शास्त्रों के अनुशीलन में लग गए। उनका आत्म चिंतन बढ़ा और तदनन्तर उन्हें विश्वास हो गया कि कृष्णभक्ति ही जीव की परमगति है। इसके पश्चात् उनका चित्त भक्ति में निमग्न हो गया। उन्होंने कृष्णभक्ति का उपदेश किया। उनके उपास्यदेव दो हाथ वाले मुरलीधर श्रीकृष्ण थे।

चारों ओर उनकी ख्याति हो गई। लोग उनका शिष्यत्व ग्रहण करके भक्तिरस का आस्वादन करने लगे। चौतीस वर्ष की आयु में उन्होंने तीर्थाटन प्रारम्भ किया। काशी, गया, वृन्दावन, मथुरा, बदरिकाश्रम, द्वारिका, रामेश्वर आदि देखकर अनेक विद्वानों के साथ शास्त्रालोचन करते हुए वे घर लौटे।

एक बार उनका माधव नाम के पण्डित के साथ समागम हुआ। वे माधव शाक्त थे। शङ्कर के साथ उनका शास्त्रार्थ हुआ। वहां उन्होंने श्रीभागवत के इस पद्य को कहते हुए बताया कि वृक्ष की जड़ सींचने से जैसे सारी शाखाऐं हरी हो जाती है वैसे ही भगवान् श्रीकृष्ण की भक्ति करने से सारे देवता सन्तुष्ट हो जाते हैं। शङ्करदेव का प्रभाव माधव पर अच्छी प्रकार हुआ जिससे उन्होंने श्रीशङ्कर से वैष्णव व्रत की दीक्षा ली। इसके पश्चात् दामोदर नाम के ब्राह्मण उनके शिष्य हुए। दामोदर ने वैष्णव धर्म का प्रचार प्रारम्भ किया। हरिदेव नाम का कोई अन्य विद्वान् शङ्करदेव की शिष्यता को ग्रहण करके

असम प्रान्त में कृष्णभक्ति को फैलाने लगे। इस प्रकार शङ्कर ने और उनके शिष्यों ने असम प्रान्त की भूमि कृष्ण भक्ति के रस से आप्लावित कर दी।

इसके पश्चात् दूसरी बार अपने शिष्यों के साथ तीर्थयात्रा के लिए गए। दक्षिण प्रदेश के अनेक तीर्थों के दर्शन करके वहां श्रीकृष्णभक्ति का प्रचार करते हुए जगदीशपुरी में आए। वहाँ उनका श्रीचैतन्य महाप्रभुके साथ समागम हुआ। कुछ दिन पुरी में निवास करके श्रीचैतन्यमहाप्रभु के समागम का लाभ प्राप्त करके वे अपनी शिष्य मण्डली के साथ असम प्रान्त में लौटे। कूच बिहार के महाराज के साथ भी उनका साक्षात्कार हुआ। 120 वर्ष की आयु में असम वैष्णव सम्प्रदाय के प्रवर्तक महान् भक्त श्री शङ्करदेव संसारलीला को समाप्त करके विष्णु के परम पद को प्राप्त हुए।

इसके पश्चात् इनके सम्प्रदाय के दो रूप हो गए। माधव के अनुयायी महापुरुषीय वैष्णव और दामोदर के अनुयायी दामोदरीय वैष्णव कहलाने लगे। हरिदेव श्रीशंकर के पुत्र ने भी एक सम्प्रदाय बनाया जो हरिदेव सम्प्रदाय के नाम से प्रख्यात हुआ।

**किशनपोल बाजारः, जयपुरम्**

---

# सूक्ति-सुधा

**❑ डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**सत्यं हितं मितं ब्रूयान्मर्म हिंसादिन वर्जितम्।**
**धर्मोपदेशकं सारं मुनीशः कर्णसौख्यदम्।।**

-मुनिराज को सत्य, हित, मित, मर्मभेदी, हिंसादि से रहित, धर्म का उपदेश देने वाले सारपूर्ण कानों को सुख देने वाले वचन बोलना चाहिये।

**कर्कशं निष्ठुरं निन्द्यं पापाढ्यं दुःख कारणम्।**
**हिंसादिछकरमन्यच्च न वक्तव्यं विवेकिभिः।।**

- विवेकी पुरुष को कर्कश निष्ठुर, निन्दनीय, पापपूर्ण, दुःख कारक, हिंसाकारक और इसी प्रकार के अन्य वचन नहीं बोलना चाहिए।

**जिह्वाख्या सर्पिणी नित्यं स्थिता सद्वदने बिले।**
**लोकं जिघत्ससि त्वं हि सत्यमन्त्रेण कीलय।।**

-असत् (दुर्जन) मनुष्यों के मुखरूपी बिल में जिह्वा नाम की सर्पिणी नित्य स्थित रहती है। वह लोक को खाना चाहती है । तुम उसे सत्य रूपी मंत्र से कीलित करो।

**प्राणान्तेऽपि न वक्तव्यमसत्यं निन्दितं बुधैः।**
**असत्यवचने जीवो निन्द्यं श्वभ्रं हि गच्छति।।**

-विद्वानों को प्राणान्त के समय भी असत्य और निन्दित वचन नहीं बोलना चाहिये। निश्चय से असत्य वचन बोलने वाला जीव नरक गति को जाता है।

**मधुजन परसेव्यं स्वर्ग मोक्षैकद्वारं,**
**सकल सुख निधानं धर्मबीजं गुणाख्यम्।**
**जिनवचन विविक्तं सर्व पापापहारं।**
**शिवकरमपि सारं, त्वं वचो ब्रूहि सत्यम्।।**

-बुद्धिमानों के द्वारा सेवनीय स्वर्ग-मोक्ष का द्वार, समस्त सुखों का भण्डार, धर्म का मूल, गुणो से युक्त, जिनेन्द्र के वचनों से पवित्र, सर्व पापों को हरने वाला, कल्याण करने वाले सार पूर्ण वचनों को तुम बोलो।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# पुराणलक्षणम्

❑ अवधेश कुमारः

पुराणविषयकं लक्षणं पुराणानां वर्ण्यविषयमुपस्थापयति। अमरकोशकारोऽमरसिंहः कोशग्रन्थे पुराणलक्षणं निम्नानुसारं प्रस्तौति-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्[1]।।**

अयमेवोल्लेखो विष्णुपुराणे ब्रह्माण्डपुराणे पुराणान्तरे चापि अविकलरूपेणोपलभ्यते। अनेनेदं प्रमाणितं भवति यत् सम्भवतोऽमरकोशकारः पुराणोक्तमेव पद्यमिदमुद्धृतवान्। अस्मिन् लक्षणे पुराणस्य वर्ण्यं समग्रं पञ्चभागेषु प्रविभक्तं दर्शितम्। एषां पञ्चानां विषयवस्तु निम्नानुसारं विज्ञापयितुं शक्यते-

**सर्गः**- जगदुत्पत्तिरेव सर्गः। स च सृष्टिरिति शब्देनाऽप्याख्यातः। सर्गोऽयं द्विधा स्थावरसर्गो जङ्गमसर्गश्च। केषाञ्चन मते तिर्यञ्च सर्गोऽपि ग्राह्यः। केचनान्ये प्राकृतः सर्गः भूतसर्गश्चेति द्विधा स्वीकुर्वन्ति। श्रीमद्भागवतमहापुराणे तु 'सर्ग' शब्दोऽयमित्थं पारिभाषितोऽस्ति-

**अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः।**
**भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।।** [1]

अर्थात् मूलप्रकृतौ विद्यमानानि सत्वरजस्तमांसि यदा विक्षुब्धानि भवन्ति तदा महत् तत्त्वमुत्पद्यते। महत्त्वात्त्रिविधस्याहङ्कारस्योत्पत्तिर्भवति। त्रिविधाहंकारेणैव पञ्चतन्मात्राणाम् एकादशेन्द्रियाणां पञ्चभूतानां चोत्पत्तिर्भवति। अयमेवोत्पत्तिक्रमः सर्गनाम्ना अभिहितोऽस्ति।

1. अमरकोश- मत्स्य 53/64, विष्णु 3/6/24, ब्रह्माण्ड-1/38, मार्कण्डेय-134/13, स्कन्द-2/04

1. श्रीमद्भागवतम् - 12/7/11

**प्रतिसर्गः**

प्रतिसर्गः प्रलयः। यदा सृष्टिः क्रमेण क्षयं प्राप्यान्ते सर्वतोभावेन विलीनताम् उपयाति तदा तदीया साऽवस्था प्रतिसर्ग इति संज्ञयाऽभिधीयते। श्रीमद्भागवतेऽस्य कृते 'प्रतिसंक्रमः' 'संस्था' चेति शब्दौ प्रयुक्तौ। तत्र 'प्रतिसंक्रमः' अनुक्रमिकी क्षयावस्थाया नाम। यथोक्तं तत्र-

**कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः।**

संस्थाशब्दस्तु चतुर्विधस्य प्रतिसर्गस्य कृते प्रयुक्तोऽस्ति। यथा-

**नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः।**
**संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः।।**[1]

**वंशः**-

सन्ततिपरम्परा 'वंश' इति शब्देनोच्यते। पुराणेषु राजवंशानां वर्णनानि उपनिबद्धानि सन्ति। ऐतिहासिककालक्रमस्य अवबोधाय तेषां महती उपयोगिता स्वीक्रियते। राजवंशानां सन्दर्भे 'वंश' शब्दस्याभिप्रायो भागवतकारेणैवं दर्शितोऽस्ति-

**राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः।।**[2]

अत्र त्रैकालिक इति कथनेन वर्तमान-भूत-भविष्यत् कालिकानां राज्ञां वंशपरम्परानिर्देशोऽभीष्टः। तस्मादेव पुराणेषु भाविनृपाणामपि पूर्वमेव कथनं कृतमस्तीति पुराणकारस्य दिव्यदृष्टेः परिचायकत्वमत्र ग्राह्यम्।

यथा राजवंशानां पुराणे वर्णनं तथैव ऋषिवंशानामपीति केचिद् आमनन्ति। मन्वन्तराणि-

'मन्वन्तर' इति शब्दः कालमानविशेषं ज्ञापयति।

1. श्रीमद्भागवतम् - 12/7/17, 2. श्रीमद्भागवतम् - 12/7/16

अनेन शब्देन 'मनु' इत्यस्य पदविशेषस्याधिकारिणः कालोऽर्थात् जीवनावधिः गृह्यते। एवञ्चेन्मनुरेव मन्वन्तराधिपः। मनवश्च सावर्णिब्रह्मसावर्णिवैवस्वतादयः पुराणेषु वर्णिताः। प्रतिकल्पं चतुर्दश मन्वन्तराणि भवन्ति। एकस्मिन् मन्वन्तरे च एकसप्ततिचतुर्युगीनामाकलनं क्रियते। मन्वन्तरे मनुर्नैकाकी प्रवर्ततेऽपितु तस्य षड् सहाया अपि शाश्वतिका भवन्तीति श्रीमद्भागवते विनिर्दिष्टम्। तद्यथा –

**मन्वन्तरं मनुर्देवाः मनुपुत्राः सुरेश्वरः।**
**ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते।।**[1]

**वंशानुचरितम्-**

मनुवंशे प्रसूतानां महर्षीणां राजर्षीणाञ्च यज्जीवन-चरितं लोकैरनुकरणीयं तस्य समावेशोऽपि पुराणेषु प्रधानवर्ण्यत्वेन विधीयमानोऽस्ति। अत्र मतद्वैविध्यं वर्तते। केचन वदन्ति यत् पुराणेषु महर्षीणां चरितम् आनुषङ्गिकम् अस्ति, राजर्षीणामेव च चरितं प्रधानं वर्तते। केचिदन्ये वदन्ति राजवंश्येषु ये वंशधरास्तेषामेव चरितं पुराणेषु लभ्यते। यथोक्तं श्रीमद्भागवतमहापुराणे–

**वंशानुचरितं तेषां वृत्तं वंशधराश्च ये।**[2] इति

विषयेऽस्मिन् विशेषेणेदमुल्लेखनीयं वर्तते यत् सूर्यचन्द्र-यदु-तुर्वसु-कुरु-प्रभृतीनां राजवंशानां ये विशिष्टा राजानस्तेषां चरितानि पुरातनपुराणेषु आन्ध्रगुप्त-मौर्यादिवंश्यानां च केषांचन परवर्त्तिषु पुराणेषु द्रष्टुं शक्यन्ते।

श्रीमद्भागवते पुराणानां दशलक्षणानि विनिर्दिष्टानि। तत्र द्वितीयाध्यायेऽधोलिखितं पद्यं प्राप्यते–

**अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।**
**मन्वतरेशानुकथा निरोधो मुक्तिराश्रयः।।**[1]

उपर्युक्तोल्लेखानुसारं दशलक्षणान्येवं व्याख्यातुं शक्यन्ते–

1. श्रीमद्भागवतम् –12/7/15, 2. श्रीमद्भागवतम् – 12/7/16
1. श्रीमद्भागवतम् – 2/10/01,

(i) **सर्गः**- पूर्वोक्तः सृष्टिरित्यस्य पर्यायः। जगदुत्पत्ति-वर्णनमिति अनेन बोध्यते।

(ii) **विसर्गः**- विविधः सर्गः विसर्गः। अर्थात् सृष्टेर्विकासः कथं बभूव। विकासस्य तस्य किमितिवृत्तमस्तीति चास्य सर्वं ज्ञानं पुराणेषु समाहितं भवति। प्राकृतः सर्गः वैकृतः सर्गः भूतसर्गश्च प्रायेण सृष्टिविकासप्रसङ्गे सांख्या-दिशास्त्रेषु प्रतिपादितानि वर्तन्ते तेषामेव विस्तरणे स्पष्टतया च वर्णनं पुराणेषु द्रष्टुं शक्यन्ते।

(iii) **स्थानम्-** सर्गविसर्गौ उभौ कुत्र स्थानम् आपद्येते। ब्रह्माण्डे एव इमावुभौ भवतः अतएव ब्रह्माण्डस्यान्तर्गतं विद्यमानानां लोकानां वर्णनानि 'स्थान' शब्देन समाख्यातानि। शास्त्रीयदृशा भुवनकोशस्य निखिलं ज्ञानं विज्ञानं च एतदायत्तं पुराणेषु चावश्यं समाहितं वर्तते। अतएवास्यापि प्रधानलक्षणेषु गणनीयत्वं विनिर्दिष्टम्।

(iv) **पोषणम्-** पोषणं तदनुग्रहः इति श्रीमद्भागवते एव कथितमस्ति। अनेन विज्ञायते यत् भगवद्ग्रहः कथं सम्भवेत् के च तदुपाया इत्येवंविधं चिन्तनं पुराणेषु विहितमस्ति। अस्यान्तर्गतम् अनेके दार्शनिक-विषयाः भक्त्यादिमार्गाश्च समाहिताः सन्ति।

(v) **ऊतयः**- श्रीमद्भागवतानुसारेण ऊतयः कर्मवासनाः भवन्ति। श्रीमद्भागवतस्य श्रीधरीटीकाकारोऽस्य व्याख्यायां लिखति –

"ऊयन्ते कर्मभिः सन्तन्यन्ते इति ऊतयः।" कर्मणां वासना 'वेञ् तन्तुसन्ताने' इति धातोः क्तिन्प्रत्यये सम्प्रसारणे च ऊतिरिति रूपं सिद्धम्।

अस्य बहुवचने रूपम्। वासनानामानन्त्यात्।''

यद्वा वृद्ध्यर्थात्संश्लेषार्थाद्वाऽवतेर्धातोरिदं रूपम्। 'अव रक्षणे' इति धातोः क्तिन्प्रत्यये सम्प्रसारणे अल्लोपे च ऊतिरिति रूपं सिद्ध्यति। एवं चेद् ऊयन्ते कर्मभिर्बृह्यन्ते संश्लिष्यन्ते इति वा ऊतय इत्यर्थः।[1]

उक्तव्याख्ययेदं स्पष्टीभवति यत् कर्म-कर्मफल-पुनर्जन्मादीनां विषयाणां वर्णनानि अस्यान्तर्गतं पुराणेषु समाहितानि भवन्ति।

(vi) **मन्वन्तराणि**- पूर्वोक्तानि कालविशेषविज्ञापकानि। चतुर्दशमनूनां कालखण्डे सृष्टेः प्रसारस्य विषयरूपाणीमानि विज्ञातव्यानि। श्रीमद्भागवतानुसारं सद्धर्मस्य प्रत्यक्षीकरणाय पुराणेष्वेषां वर्णनानि विहितानि वर्तन्ते।

(vii) **ईशानुकथा** - ईश्वरस्य अनुकथानाम् अवतार-चरितानां वैविध्येन प्रस्तुतिरपि पुराणानां वर्ण्य-विषये प्राधान्यमावहति। श्रीमद्भागवतकारोऽस्य लक्षणमेवमुल्लिखति-

**अवतारानुचरितं हरेश्चास्यानुवर्त्तिनाम्।**
**सतामीशकथा प्रोक्ता नानाख्यानोपबृंहिताः।।**[1]

प्रतिकल्पं प्रतिमन्वन्तरं च श्रीहरेरवताराणां तात्कालिकीनां तल्लीलाकथानां च रुचिरा प्रस्तुतिरपि पुराणलक्षणरूपेति वक्तुं शम्यते। केषुचित् पुराणेषु दशावताराणां केषुचिच्च चतुर्विंशतिसंख्याकानामवताराणां चरितान्युपनिबद्धानि प्राप्यन्ते। कल्पभेदात् तत्र वर्ण्य-प्रस्तुतौ मिथो भेदोऽपि लक्ष्यते।

1. श्रीमद्भागवतम्/श्रीधरी टीका-2/10/04
1. श्रीमद्भागवतम्-2/10/05

(viii) **निरोधः** - 'निरोध' शब्दोऽत्र प्रलयस्य पर्यायः। अस्य परिभाषणमेवं प्रस्तुतं वर्तते श्रीमद्भागवत-महापुराणे -

**निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः।**[2]

अर्थात् यदा आत्मरूप ईश्वर आत्मनः शक्तिभिः सह अनुशयनं करोति तदा तस्य निरोध इति संज्ञा भवति। एवञ्चेदपि पञ्चलक्षणेषु पूर्वोक्तेषु प्रतिसर्गस्यैव प्रतिनिधिलक्षणमिदं ज्ञेयम्।

(ix) **मुक्तिः** - सांसारिकजीवानां सांसारिकबन्धने-भ्यः सार्वकालिकं पृथक्करणं मुक्तिरित्यभि-धीयते। तदानीं जीवः स्वस्वरूपेऽर्थात् ब्रह्मण्येवावस्थितो भवति। श्रीमद्भागवत-कारोऽस्य लक्षणमित्थं प्रस्तौति तत्रैव श्रीमद्भागवतमहापुराणे द्वितीयाध्याये-

**मुक्तिर्हित्वाऽन्यथारूपं स्वस्वरूपे व्यवस्थितिः।**[1]

(x) **आश्रयः**- आश्रयः परमाधिष्ठानं जीवाजीवानां चराचराणां ब्रह्माण्डस्य च ब्रह्मैव नान्यः। यथा चोक्तम्-

**आभासश्च निरोधश्च गतश्चाध्यवसायते।**
**स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते।।**[2]

अर्थात् यस्मिन् परतत्त्वे सृष्टिः प्रलयश्चोभावेव भासेते यस्मिन्नेव च सर्वं लौकिकम् अध्यवसायजातम् अनुष्ठीयते तदेव ब्रह्म परमात्मरूपं सद् आश्रयशब्देन उच्यते। एवं चेद् ब्रह्मविज्ञानमपि निखिलं पुराणवर्ण्येषु प्रधानभूतम्।

श्रीमद्भागवते एव द्वादशाध्याये येषां दशलक्षणानां निर्देशो विहितः सोऽस्माद् द्वितीयाध्यायोक्ताल्लक्षणात् क्वचिद्भिन्नः ब्रह्मवैवर्त्तपुराणानुसारी चावलोक्यते। तद्यथा-

2. श्रीमद्भागवतम् -2/10/06 पूर्वार्द्धः।
1. श्रीमद्भागवतम्-2/10/06 उत्तरार्द्धः। 2. श्रीमद्भागवतम्-2/10/7

**सर्गश्चाथ विसर्गश्च वृत्तिः रक्षान्तराणि च।**
**वंशो वंशानुचरितं संस्था हेतुरपाश्रयः।।[3]**

अस्मिन्नुल्लेखे सर्गः सृष्टिः संस्थाः, प्रलयः, अन्तराणि मन्वन्तराणि वंशः राजवंशो वंशानुचरितं राजवंश्यचरितं चेति पूर्वोक्तपञ्च-लक्षणेषु निर्दिष्टमेव। विसर्गः सृष्टिविकासः, रक्षा ईक्षानुकया अपाश्रयः आश्रयः एवेति पूर्वोक्त दशलक्षणेषु सम्प्रोक्तमेव। वृत्तिः हेतुश्चात्र नूतनलक्षणत्वेनोक्तौ। तत्र-

(i) **वृत्तिः**- आचारविचाररूपा वृत्तिस्तन्निर्देशा लोकव्यवहाराय पुराणेषु कथान्तराणां माध्यमेन यत्र तत्र प्रस्तुना भवन्ति। श्रीमद्भागवतकारः वृत्तिर्द्विधेति प्रतिपादयति। प्रथमं कामात् अर्थात् स्वेच्छया प्रवृत्तिर्भवति तत्र यन्निसर्गः कारणं तदेव वृत्तिमूलं ज्ञेयम्। द्वितीयं चोदनया अर्थात् प्रेरणया तच्चोपदेशैरेव सम्पद्यते। तदेव पुराणेष्वपि यत्र कुत्रचिदुपनिबध्यते इत्याशयः।

(ii) **हेतुः** - हेतुशब्दोऽत्र प्रकृतिं बोधयति। पुराणेषु ईश्वरशक्तित्वेन क्वचित् प्रकृत्या ब्रह्मशक्तित्वेन क्वचिच्च मायायाः प्रतिपादनं कृतमस्ति। तदेवात्र हेतुशब्देन संकेतितं वर्तते। उक्तं च श्रीमद्भागवते-

**हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः।**
**तं चानुशयिनं प्राहुरव्याकृतमुतापरे।।[1]**

एवं पुराणानां वर्ण्यविषयं बोधयितुं पञ्चलक्षणानि दशलक्षणानि च पुराणेषु सम्प्रोक्तानि वर्तन्ते। एभिर्लक्षणैः पुराणानां वैशिष्ट्यं पुरातनज्ञानदृशा ऐतिह्यदृशा लोक-कल्याणदृशा च विज्ञापितं भवति। समालोच-कानां मतेन दशलक्षणानि पञ्चलक्षणानामेव विस्ताररूपाणि विज्ञातव्यानि। केषांचन मतेन दशलक्षणानि केषांचन एव प्राक्तनपुराणानां वर्ण्यबोधकानि, न सर्वेषाम्। किन्त्विदं मतं सर्वसम्मतं नास्ति।

**शोधछात्र**
**ज.गु.रा. राज. संस्कृत विश्व. जयपुर**


3. श्रीमद्भागवतम्-12/7/9

1. श्रीमद्भागवतम्-12/7/18

**स्वरचित लघुचित्रकाव्यम्**

# संस्कृत चित्रशिक्षणम्

❑ **श्वेता दाधीच**



**1. महर्षेः पाणिनेः प्रसिद्धा रचना**

**2. श्रीमदमरसिंहविरचितः कोशः**

**3. रामायणस्य द्वितीय काण्डोऽयं**

**4. कालिदासस्य सर्वस्वम्.......**

**5. अलंकारशास्त्रस्य प्रसिद्धपुराणम्**

**6. भासस्य लोककथाश्रितनाटकोऽयम्**

**7. शालिहोत्रस्य रचितचिकित्साशास्त्रम्**

**8. वेदेषु चतुर्थोऽयम्**

**9. मुरारेः कवेः प्रसिद्धं नाटकमिदम्**

**10. दण्डीकवेः प्रसिद्धा कथारचनेयम्**

**संस्कृताध्यापिका**
**जोधपुरम्, राजस्थानम्**

# स्मृतिकाव्यकालयोः गुरु-शिष्यसम्बन्धः

❑ ओमप्रकाश अग्रवालः

**अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।**
**तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।।**
**न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः।**
**तत्त्वज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः।।**

कस्यापि देशस्य जातेः वा प्रगतेः मूलाधारः शिक्षा भवति। शिक्षायाः च ध्रुवद्वयं मन्यते शिक्षकः शिक्षार्थी च अर्थात् गुरुः शिष्यश्च। गुरुः शिक्षाप्रदानं करोति शिष्यश्च शिक्षां गृह्णाति। शिक्षायाः उद्देश्यप्राप्त्यर्थम् आवश्यकं एतदस्ति यत् द्वयोः मध्ये समुचितं सामंजस्यं भवेत्। शिक्षणपद्धतेः सफलतापि द्वयोरुपरि एव आयत्ता। पितरौ तु केवलं बालकं जनयतः परन्तु गुरुः अपरिपक्वबुद्धेः बालकस्य भारः स्वोपरि गृहीत्वा जीवनोपयोगिज्ञानेन तस्य सफलनागरिकस्य निर्माणं करोति। तस्य अज्ञानरूपम् अंधकारं समाप्य तं ज्ञानरूपिणा प्रकाशेन प्रकाशितं करोति। कथितं यत्-

**''अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।**
**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।''[1]**

अतः शिक्षणपद्धतेः सफलतायाः कृते आवश्यकं यत् गुरुशिष्ययोः मध्ये आत्मिकः सुमधुरश्च सम्बन्धो भवेत् यतोहि द्वयोः परस्परं घनिष्ठः सम्बन्ध एव यस्याभावे शिक्षायाः सफलता सम्भवा न वर्तते।

**''अथ अधिविद्यम्। आचार्यः पूर्वरूपम्।**
**अन्तेवासी उत्तररूपम्। विद्या सन्धिः।**
**प्रवचनं सन्धानम्। इति अतिविद्यम्।''[2]**

उचितसामंजस्याभावात् द्वयोः मध्ये शिक्षोद्देश्यस्य पूर्तिः कदापि न भवति इति तथ्यम् अस्माकं प्राचीनै ऋषिमुनिभिः अवगतम्। एतस्मात् कारणात् एव प्राचीनभारते गुरुशिष्ययोः मध्ये पिता-पुत्रवदप्यधिकं आत्मीयमधुरसम्बन्ध आसीत्। प्राचीनकाले शिक्षायाः प्रयोजनं निःश्रेयसाभ्युदययोः श्रेयःप्रेययोः इहलोक-परलोकयोः द्वयोः विज्ञाने शिष्यस्य निष्णातकरणमासीत्। शिक्षायाः विभिन्नानुक्रमानुसारेणैव शिक्षकशिक्षार्थिणां विभिन्नश्रेणयः भवन्तिस्म। यथा-गुणातीतावस्थापर्यन्तं ज्ञानप्रदानकारक एव 'गुरुः' उच्यते। कथितं यत्-

**''गुकारं च गुणातीतं रूकारं रुपवर्जितम्।**
**गुणातीतस्वरूपं च यो दद्यात्स गुरुः स्मृतः।।''[3]**

आचार्यस्य जीवनमेव छात्राणां कृते आदर्शरूपेण भवति स्म। अतएव तेषु अनेकेषां गुणानामपेक्षा आवश्यकी। अस्माकं प्राचीनमनीषिणः शिक्षकाणां विषये कथयन्ति यत्-शिक्षकाः शान्तचित्ता भवेयुः, कमपि छात्रं प्रति पक्षपातं न कुर्युः, शास्त्रेषु पारंगताः, स्वाध्यायरताः भवेयुः, वाक्पटवः वक्तारः, प्रत्युत्पन्न-मतयः, तार्किकाः, रोचककथानां ज्ञातारः, कठिनाति-कठिनतमशब्दानां अर्थप्रकटीकरणे समर्थाः भवेयुः। एतेषां शिक्षकाणां गुणानां विषये महाभारते कथितमस्ति यत्-

**''प्रवृत्ता वाक् चित्तकथः ऊहवान् प्रतिभानवान्।**
**आशु ग्रन्थस्य वक्ता च यः स पण्डित उच्यते।।''[4]**

संक्षेपेण कालिदासमतानुसारेण आचार्यस्य कृते केवलं विद्वानेव न अपितु कुशलाध्यापकोऽपि भवेत्। अध्यापकेषु उच्चकोटियोग्यतायाः अपेक्षा कर्तुं शक्यते। येन तस्य स्वपवित्रतया चारित्रिकबलेन पाण्डित्येन सदाचारिजीवनेन च शिक्षाप्राप्तछात्राणां जीवने उत्तमप्रभावो जनवितुं शक्यते।

1. गुरुगीता. 34, 2. तै. उ. 3/2

3. श्री गुरू गीता 46, 4. महाभारत, 5/33/33

मनुस्मृत्याधारेण गुरोः त्रिविधायां श्रेण्यां विभाजनं कृतं यो ब्राह्मण शिष्यस्य उपनयनसंस्कारं कृत्वा यज्ञविद्योपनिषद्सहितं वेदाध्ययनं कारयेत् स आचार्य उच्यते–

**''उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।**
**सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।''**[5]

आंशिकरूपेण वेदवेदांगानां वा जीविकोपार्जनार्थं अध्यापनकार्यकारी 'उपाध्यायः' इति उच्यते–

**''एकदेशं तु वेदस्य वेदांगान्यपि वा पुनः।**
**योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते।।''**[1]

अतएव दशोपाध्यायापेक्षया एक एव आचार्यः श्रेष्ठो मन्यते यथा–

**''उपाध्यायान्दशाचार्य आचार्याणां शतं पिता।**
**सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते।।''**[2]

यः विप्रः निषेकादिकर्माणि विधिपूर्वकं सम्पादयति अन्येन उपायेनापि सम्भावनीयं करोति सैव गुरुः कथ्यते यथा–

**''निषेकादीनि कर्माणि यः करोति यथाविधि।**
**सम्भावयति चान्येन स विप्रो गुरुरुच्यते।।''**[3]

लोकव्यवहारे अध्यापनकार्यरतजनानां कृते गुरुः शब्दः अधिकाधिकं प्रचलति। गुरु शब्दस्य व्याख्या एवमेव क्रियते–

1. गिरति सिंचति कर्णयोर्ज्ञानामृतम् इति गुरुः। अर्थात् यः शिष्यकर्णयोः ज्ञानरूपामृतसिंचनं करोति स एव गुरुः कथ्यते। (गृ–सेचने भ्वादिः)

2. गिरति अज्ञानान्धकारमिति गुरुः। अर्थात् यः स्वसदुपदेशमाध्यमेन शिष्याणां अज्ञानरूपम् अंधकारं विनाशयति सैव गुरुः। (गृ–निगरणे तुदादिः)

3. गृणाति धर्मादिरहस्यमिति गुरुः। अर्थात् यः शिष्यान् प्रति धर्मादिज्ञातव्यतथ्यानि उपदिशति स एव गुरुः कथ्यते। गृ–शब्दे क्रयादिः)

4. गारयते विज्ञापयति शास्त्ररहस्यमिति गुरुः। अर्थात् यः वेदादिशास्त्ररहस्यानि शिष्यान् अवगमयति स एव गुरुः उच्यते। (गृ–विज्ञाने चुरादिः)

गुरुगीतानुसारेण 'गु' शब्दस्यार्थो भवति 'अन्धकारः' तथा च 'रु' शब्दस्यार्थो तस्य निरोधः विनाशः वा। एवमेव अन्धकारस्य निरोधत्वात् सः गुरुपदेन वाच्योऽस्ति–

**''गुशब्दस्त्वन्धकारे स्याद् रुशब्दस्तन्निरोधके।**
**अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते।।''**[4]

वर्तमानशिक्षापद्धत्याम् अस्यानुकरणे प्रोफेसर रीडर लैक्चरर इंस्ट्रक्टरश्च प्रभृतीनां शब्दानां प्रचलनमस्ति।

मनुस्मृतिपराशरस्मृतिग्रन्थेषु 'गुरु' शब्द पारिभाषिकशब्दोऽस्ति। गुरुः उपनयनसंस्कारं कारयित्वा शिष्यानां वेदाध्ययनं प्रारम्भयति स्म तथा च सम्पूर्णवेदं पाठयित्वा तस्य कण्ठस्थीकरणं च कारयति स्म येन शिष्यानां कण्ठे वेदः निवासमकरोत्। शिष्यस्य आचरणं पूर्णरूपेण वैदिकं भवति स्म। एवमेव उनयनसंस्कारा–नन्तरं वेदाध्यापक एव 'गुरु' पदम् अलंकरोतीति।

**''स गुरुः यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति।''**[5]
**''उपनीय तु यः शिष्यं वेदमध्यापयेद् गुरुः।''**[6]

पणिनीयशिक्षायाः लेखकः गुरुं प्रति प्रणामं कृत्वा कथयति यत्– अज्ञानरूपान्धकारेण आच्छादित–त्वात् स्वान्धचक्षुः ज्ञानरूपाञ्जनशलाकया येन उन्मीलितं तं गुरुं प्रणमामि। भवभूतिना अत्रैव सत्कार्यवादः स्वीक्रियते। महाकविः भवभूतिः कथयति यत्– गुरोः अध्यापनं शिष्यस्य मानसिकयोग्यताग्रहणशक्तेः च तारतम्ये शिष्ये

5 मनुस्मृति 2/140 1 मनुस्मृति 2/141, 2 मनुस्मृति 2/1405
3 मनुस्मृति 2/142

4 श्री गुरुगीता. 19, 5 पाराशर स्मृति 1/34, मनुस्मृति 2/140

विद्यमानशक्तेः प्रादूर्भावायावसरप्रदानं करोति। गुरुः तु प्राज्ञजडयोश्च उभयोरपि शिष्ययोः कृते समभावेन विद्यां वितरति। प्राज्ञे तु ज्ञानशक्तिम् उत्पादयति जडशिष्ये च ज्ञानशक्तेः विनाशं करोति इति न। किंतु फलपरिणामे च भेदं प्राप्नोति। उचितमस्ति बिम्बग्रहणे शुचिर्मणिः समर्थः मृत्तिका तु न समर्था भवति। कथितं यत्–

**''वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे,**
**न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।**
**भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा,**
**प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः।।''**[1]

परम्पराप्राप्तमन्त्र एव फलप्रदायको भवति अतएव मन्त्रोपदेशस्य कृते गुरोः आश्रयणमावश्यकमेव। अद्य मन्त्राणां जनाः इतस्ततः पुस्तकेषु ग्रहणं कृत्वा जपं कुर्वन्ति किन्तु यदा फलप्राप्तिर्न भवति तदा मन्त्राणां कृते दोषारोपणं कुर्वन्ति एवम् उचितं न। अतएव पुष्प-दन्ताचार्यमहोदयः स्व 'महिम्नस्तोत्रे' कथयति यत्–

**''महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।**
**अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम्।।''**[2]

वैयाकरणविदुषामपि एष उपदेशो महत्त्वपूर्णोऽस्ति यत्–

**''यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो माभूत् सकलं शकलं सकृत् शकृत्।।''**[3]

किंतु व्याकरणस्य उत्तमकोट्याः विदुषाम् उच्चारणेषु अशुद्धिं श्रुत्वा एतत् प्रतीयते यत् केवलं व्याकरणस्यैव अध्ययनं पर्याप्तं न, अपितु गुरोः एतद्विषयकावधानं परमावश्यकमेव। गुरुं विना शुद्धोच्चारणं नैव सम्भविष्यति।

तुलसीकृतरामायणेऽपि अनेकेषु दृष्टान्तेषु गुरु-शिष्यसम्बन्धः प्रतिबिम्बितः। राजा दशरथोऽपि अपूर्वः गुरुभक्त आसीत्। सः रामं सर्वगुणसम्पन्नं मन्यते स्म। प्रजा अपि इच्छन्ति यत्– श्रीरामः राजा भवेत् किंतु दशरथः गुरोः वसिष्ठस्य आज्ञां प्राप्तुम् इच्छति स्म। कथयति यत्–

**''जे गुरु चरण रेणु सिर धरही,**
**ते जनु सकल विभव बस करही।**
**मोहि समान यह अनुभवऊ न दूजे,**
**सब पाउऊ रज पायन पूजे।।''**

एषु चरणेषु गुरु-शिष्यसम्बन्धस्य उत्कृष्टता दृष्टिगोचरीभवति। तुलसीदासः कथयति यत् हठधर्मिता अत्यंतदुर्गुणो भवति। हठधर्मित्वात् शिष्यानां कृते दुःखानां प्राप्तिर्भवति।

**''हठवश सब संकट सहे, गालव नहुष नरेश।''**[4]

महाकविकालिदासोऽपि गुरुशिष्यसम्बन्धः ''मधुरतरो भवेदिति'' स्वीकरोति। कथयति यत् गुरोः प्रकारद्वयं भवति। एके स्वान्तर्गतागाधपाण्डित्ययुता भवन्ति अपरे तु स्वज्ञानस्य शिष्ये संक्रान्तकला निपुणा भवन्ति। परन्तु यस्मिन् कलाद्वयं स एव शिक्षकः उत्तमशिक्षको मन्यते। कथितं यत्–

**''श्लिष्टा क्रिया कस्यचिदात्मसंस्था,**
**संक्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां,**
**धुरि प्रतिष्ठापयितव्य एव।।''**[5]

रघुवंशमहाकाव्ये कौत्स-रघु संवादेऽपि अभूतपूर्व-दृश्य दर्शनीयएव। यदा कौत्सः गुरोः दक्षिणार्थं राज्ञो रघोः

1 उत्तररामचरित. 2/4, 2 शिवमहिम्न. 35, 3 वैयाकरण महाभाष्य

4 रामचरितमानस, 5 मालविकाग्निमित्र. 1/16

समक्षे याचनां करोति तदैव गुरुनिमित्तार्थम् आवश्यकधनमेव स्वीकरोति अधिकं न। राजा रघुः अधिकं धनं दातुम् इच्छति किंतु कौत्सः कदापि न स्वीकरोति यथा-

**''जनस्य साकेतनिवासिनस्तौ,**
**द्वावप्यभूतामभिनन्द्यसत्त्वौ।''**
**गुरुप्रदेयाधिकनिःस्पृहोऽर्थी,**
**नृपोऽर्थिकामादधिकप्रदश्च।।''[1]**

कुमारसम्भवमहाकाव्ये कालिदासः पार्वतीं स्थिरोपदेशशिष्यां कथयति-

**''स्थिरोपदेशाम् उपदेशकाले**
**प्रपेदिरे प्राक्तनजन्मविद्याः।''**

**''गुरु बिनु होहि न ज्ञान भानु बिनु दिनु नहीं होवे।**
**सूर्य उदय बिनु अन्धकार कबहुं न खोवैं।।''**

गुरुंः ब्रह्माविष्णुमहेशश्च कथ्यते। सः ज्ञानस्य प्रादुर्भावकारणात् ज्ञानजगतः स्रष्टाऽस्ति तस्य विकाससंरक्षकश्चास्ति। अज्ञानसंदेहरूपविनाशक-तत्त्वानां च आक्रमणात् ज्ञानजगतः रक्षां करोति। अतः अस्य पालकोऽस्ति। अज्ञानरुपिणः अन्धकासुरस्य विनाशकत्वात् स एव रुद्रोऽस्ति, शिवः महेश्वरोऽपि चास्ति। कथितं यत्-

**''गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।**
**गुरुः साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः''**

गुरुशुश्रूषया एव ज्ञानप्राप्तिः सम्भवति। परमात्मनः दर्शनमपि गुरुकृपया सम्भवति। महाकवि कबीरदास-महोदयः अपि कथितवान् यत्-

**''गुरु गोविन्द दोनों खडे काके लागूँ पाँय।**
**बलिहारी गुरु आपने गोविन्द दिया बताय।।''**

गुरुकृपाप्राप्तः ऋषि-महर्षिः अभवत्, कविः-महाकविः अभवत्। स्वाभाविकप्रतिभायाः अभावादपि काव्यज्ञगुरुशिक्षानुसारेण अभ्यासेन कवितारचना दृश्यते। एतस्माद् कारणादेव महाकविः दण्डीः स्वग्रन्थे काव्यादर्शे लिखति यत्-

**''न विद्यते यद्यपि पूर्व वासना,**
**गुणानुबन्धि प्रतिभानमद्भुतम्।**
**श्रुतेन यत्नेन च वागुपासिता,**
**ध्रुवं करोत्येव कमप्यनुग्रहम्।।''**

गुरोः महिम्नः प्रतिदिनं उत्तरोत्तरविकासो भवति। सिक्खधर्मेऽपि गुरोः महिम्नः प्रसारोऽभवत् तस्य मन्दिरं ''गुरुद्वारा'' इत्युक्तम्। लिपेः अपि नाम गुरुलिपिः। तेषां ग्रन्थे ''गुरुग्रन्थसाहब''-नाम्नि गुरुमहिम्नः भक्तिपूर्णं गानं विद्यमानमस्ति।

भारतीयसंस्कृतेः अक्षुण्णपरम्परा आघात-प्रतिघातेषु यद् जीवति अद्यापि तस्यापि कारणमेव गुरुशिष्यपरम्परा यस्य वर्णनं वेदपुराणदर्शनोपनिषद्काव्येषु च मिलति। बौद्धजैनादयः धर्माः अपि गुरुशिष्यपरम्परां स्वीकुर्वन्ति गुरुशिष्यपरम्परायाः महिम्ना अस्य देशस्य सम्पूर्णसाहित्यं परिपूर्णं पवित्रं चास्ति।

**शोधच्छात्रः**
**( शिक्षा विभाग )**
**ज.रा.रा.सं.वि.वि., जयपुर**

1 रघुवंश. 5/31

नारी-स्तम्भः

# अनुकरणीया अनुकुमारी

❑ डॉ. राजेश्वरी भट्ट

चरन् वै मधु विन्दति वेदवाक्यमिदं हृदि संधार्य साध्यं प्रति अग्रे गच्छन्ती, 1986 तमे ख्रिस्ताब्दे हरियाणाप्रदेशस्य सोनीपतनगरे अतिसामान्य-जाटपरिवारे लब्धजन्मा अनुकुमारी बुद्धिबलेन आत्मबलेन च 2018 तमे ख्रिस्ताब्दे संघलोक-सेवाआयोगेन समायोजितायां राष्ट्रे सर्वोच्च-प्रतिष्ठितायां भारतीयप्रशासनिकसेवा इति प्रतियोगि-परीक्षायां द्वितीयं स्थानमधिगम्य विशिष्टतरा जाता। द्वात्रिंशद्वर्षाणि पूर्वं अनुकुमार्या जन्म-समये महिलाविकासदृष्ट्या हरियाणा प्रदेशः सर्वथा अविकसित आसीत्। तत्समाजे परिवारेषु कन्याजन्म कथमप्यभिनन्दनीयं नाऽमन्यत। कन्यायाः जन्मावसरे परिजनाः परिचिताः प्रतिवेशिनश्च नवजातायाः पित्रोः समक्षं वर्धापन- वचनानां स्थाने सान्त्वनावचनैः आत्मीयतां प्रादर्शयन्। नैकेषां असन्तुष्टानां मध्ये केवलं अनुकुमार्याः पिता बलजीतसिंहः कन्याजन्म मङ्गल महोत्सव इति मन्यमान औदार्यममभजत। अनुकुमार्याः पिता एकस्मिन् नैजिकप्रतिष्ठाने कार्यरत आसीत्। माता संतरादेवी च सततं गृहकार्येषु गोपालनादिषु कर्मसु च व्यस्ताऽदृश्यत। गृहे सुखसुविधानां अत्यन्ताभाव आसीत्, तथापि अनुकुमार्याः पिता अध्ययनहेतोः पुत्रीं विद्यालयं प्रेषयामास। अध्ययनशीला अनुकुमारी गृहे अध्ययनकक्षस्य अभावे शुष्कगोमयखण्डानां काष्ठखण्डानां समूहोपरि स्थित्वा अध्ययनमकरोत् कक्षायां प्रथमं स्थानञ्चालभत। विद्यालयीयां शिक्षां परिसमाप्य अनुकुमारी विज्ञानविषयमधिकृत्य स्नातकोपाधिमधिगन्तुं दिल्लीविश्वविद्यालये प्रवेश-मलभत। ततो दिल्ली विश्वविद्यालयतः 'स्नातक' परीक्षामुत्तीर्य अनुकुमारी उच्चाध्ययनस्य कृते आङ्गलभाषाया अनिवार्यतामवेक्ष्य अध्यवसायेन आङ्गलभाषायामधिकारमधिगतवती। एम.बी.ए. इति विषयस्य सेवाकार्ये सार्थकतां विचार्य अनुकुमारी नागपुरतः एम.बी.ए. इति उपाधिं गृहीतवती। अचिरमेव आत्मनो वैदुष्येण आई.सी. आई.सी.आई. इति बैंक संस्थाने कार्यं प्राप्तवती। तत आत्मनः कार्यकौशलेन दूरदृष्ट्या च अनुकुमारी दशवर्षाणि यावत् प्रतिष्ठितेषु संस्थानेषु कार्यमकरोत्। आत्मनो दक्षतया दाक्षिण्येन च इयं सर्वत्र प्रशंसनीया जाता सहैव यथासमयं वेतन वृद्ध्या सह पदोन्नत्यापि पुरस्कृता जाता। एषु दशवर्षेषु अनुकुमारी पत्नीपदेन सहैव मातृपदेन सुशोभिता जाता। तथापि येन केन प्रकारेण भारतीय प्रशासनिक सेवायां साफल्यं लभेय इमं अभीष्टं संकल्पं साधयितुं अनुकुमारी बैंकसेवाकार्यं विहाय प्रतियोगिपरीक्षायां साफल्यमधिगन्तुं कटिबद्धा जाता। स्वशुरालये वधू भावेन गृहस्य दायित्वानां मध्ये विशिष्टाध्ययनस्य व्यवस्था सुलभा नासीत् अनेनैव अनुकुमारी अल्पवयस्कं पुत्रं मातृष्वसुः संरक्षणे समर्प्य पितृगृहं गतवती। ग्रामे अनिवार्यपत्र-पत्रिकाणां अन्यसंचार-माध्यमानां सुचारू व्यवस्थाया अभावे अध्ययने समर्पिता अनुः प्रथमप्रयासे साफल्यं नाधिगतवती। किन्तु संकल्पं प्रति दृढाग्रहिला अनुकुमारी धैर्यं नाजहत्। आत्मनः संकल्पेन श्रमेण च 2018 तमे ख्रिस्ताब्दे आत्मनः स्वप्नं प्रत्यक्षं कुर्वन्ती अनुकुमारी ''भारतीय प्रशासनिक सेवा'' इति परीक्षायां राष्ट्रे द्वितीयं स्थानं प्राप्तवती। अल्प-साधनैर्महतीं सिद्धिं प्राप्य अनुकुमारी विश्वस्मिन् विश्वे अनुकरणीया वर्तते।

अनयोपलब्ध्या अनुः ''क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे'' इत्युक्तेः सार्थकत्वं साधयन्ती महिलाजगते अनुकरणीया जाता अनुकुमार्या अधिगतेन विशिष्टपदेन अद्य निखिलो हरियाणा प्रदेशः सम्मानितोऽभवत्। अस्मिन्नवसरे अनुकुमार्याः पितृकुलेन, श्वशुरकुलेन, सर्वकारेण च यत्र-तत्र समारोहा आयोज्यन्ते। नूनम् अनुकुमारी महिला नां कृते प्रेरणा स्रोतो वर्तते।

## हिन्दी अनुवाद

''उद्यम करने वाला ही अमृत प्राप्त करता है'' इस वेद वाक्य को हृदय में धारण करके अपने साध्य की ओर निरन्तर आगे बढ़ने वाली, 1986 में हरियाणाप्रदेश में सोनीपत नगर में, अत्यन्त सामान्य जाट परिवार में जन्मी, अनुकुमारी ने अपने बुद्धिबल एवं आत्मबल से 2018 ई. में संघलोक सेवा आयोग द्वारा समायोजित, राष्ट्र में सर्वोच्च प्रतिष्ठित, ''भारतीय प्रशासनिक सेवा'' परीक्षा में द्वितीय स्थान प्राप्त कर अपना वैशिष्ट्य प्रदर्शित किया। 32 वर्ष पूर्व अनुकुमारी के जन्म के समय महिला विकास की दृष्टि से हरियाणा प्रदेश सर्वथा अविकसित था। उस समय समाज में कन्या का जन्म प्रसन्नता का विषय नहीं था कन्या के जन्म होने पर परिजन, परिचित एवं पड़ोसी नवजाता कन्याके माता-पिता के समक्ष बधाई देने के स्थान पर सान्त्वना पूर्ण वचन कहकर अपनी आत्मीयता प्रदर्शित करते थे। अनेक असन्तुष्ट जनों के बीच केवल अनुकुमारी के पिता बलजीत सिंह ने कन्याजन्म को मङ्गलमहोत्सव मानते हुए अपनी उदारता प्रकट की। अनुकुमारी के पिता एक निजी प्रतिष्ठान में कार्यरत थे तथा माता 'संतरादेवी' गृहकार्य एवं गोपालनादि कार्यो में निरन्तर व्यस्त रहती थीं। घर में सुखसुविधाओं का सर्वथा अभाव था, तथापि अनुकुमारी के पिता ने पुत्री को विद्यालय भेजा। अध्ययनशीला 'अनुकुमारी' घर में अध्ययनकक्ष के अभाव में सूखे गोबर के उपलों एवं लकड़ी के टुकड़ों पर बैठकर ही अध्ययन करती थीं किन्तु फिर भी कक्षा में प्रथम स्थान प्राप्त कर परिवार के गौरव में वृद्धि की। विद्यालयीया शिक्षापूर्ण कर अनुकुमारी ने विज्ञान विषय में स्नातक उपाधि प्राप्त करने के लिए दिल्लीविश्वाविद्यालय में प्रवेश प्राप्त किया। 'दिल्ली विश्वविद्यालय' से स्नातक की उपाधि प्राप्त करने के पश्चात् अनुकुमारी ने उच्च अध्ययन प्राप्त करने के लिए अंग्रेजी भाषा की अनिवार्यता अनुभव कर पहले अंग्रेजी भाषा में पूर्ण अधिकार प्राप्त किया तदनन्तर एम.बी.ए. विषय की सार्थकता अनुभव कर 'नागपुर' से एम.बी.ए. की उपाधि प्राप्त की एवं शीघ्र ही अपनी निपुणता से आई. सी. आई. सी. आई. बैंक प्रतिष्ठान में नौकरी प्राप्त की। अपने कार्यकौशल एवं दूरदृष्टि से अनु ने दश वर्ष तक भिन्न-भिन्न प्रतिष्ठित संस्थानो में कार्य किया तथा अपनी दक्षता एवं उदारता के कारण वेतनवृद्धि एवं पदोन्नति के सम्मान से पुरस्कृत हुई। इन्हीं दस वर्षों में अनुकुमारी पत्नी एवं माता के सम्माननीय पद से भी सुशोभित हुई। फिर भी किसी प्रकार 'भारतीय प्रशासनिक सेवा' परीक्षा में सफलता प्राप्त कर सकूँ इस मनोरथ की सिद्धि के लिए अनुकुमारी बैंक की नौकरी छोड़कर प्रतियोगी परीक्षा में स्थान प्राप्त करने के लिए कटिबद्ध हो गई। ससुराल में बहुओं को घर के उत्तरदायित्व के साथ विशिष्ट अध्ययन समय सुलभ नहीं होता है इसीलिए अनुकुमारी अध्ययन के लिए अपने अल्प वयस्क पुत्र को मौसी के संरक्षण में छोड़ कर पिता के घर चली गई। गाँव में अनिवार्य पत्र-पत्रिकाओं एवं अन्य सञ्चार माध्यमों के अभाव में भी अध्ययन के प्रति समर्पित अनुकुमारी ने प्रथम प्रयास में परीक्षा में सफलता प्राप्त नहीं की किन्तु अपने संकल्प के प्रति दृढ़ महिला अनुकुमारी ने धैर्य नहीं छोड़ा। अपने दृढसंकल्प एवं श्रम से 2018 ई. में अपने संकल्प को प्रत्यक्ष कर अनुकुमारी ने 'भारतीय प्रशासनिक सेवा' परीक्षा में द्वितीय स्थान प्राप्त किया। अल्प साधनों से महान् सिद्धि प्राप्त करने वाली अनुकुमारी समस्त विश्व में अनुकरणीया है।

अपनी इस उपलब्धि से अनुकुमारी ने क्रिया की सिद्धि साधनों पर निर्भर नहीं होती, अपितु अपनी दृढ़ संकल्प सिद्धि पर ही निर्भर है की उक्ति को सार्थक करते हुए, महिला जगत् के लिए अनुकरणीय आदर्श उपस्थापित किया है। अनुकुमारी के द्वारा प्राप्त किए गए विशिष्ट पद से आज सम्पूर्ण हरियाणा प्रदेश सम्मानित हुआ है। इस अवसर पर अनुकुमारी के पीहर, ससुराल एवं सरकार के द्वारा यत्र तत्र समारोहों का आयोजन किया जा रहा है। निश्चय ही अनुकुमारी नारी जाति के लिए प्रेरणास्रोत है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# संरक्षयितव्याः स्त्रियः लोके

❏ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**असारभूतस्यास्य संसारस्यातीव श्रेष्ठे पवित्रे च भारतभूभागे न केवलं गुरुकुलेष्वथवा वनान्तभागे संस्थितेषु मुनीनामाश्रमेष्वे वा तिशुद्धाध्वरस्वाहा-कारवषट्क्रियोत्थममृतं स्वर्गौकोभिरहरहः स्वद्यते स्म अपितु गृहे गृहे संस्थापितासु यज्ञवेदिकासु जाज्वल्यमानेनाग्निना दीयमानाभिराहुतिभिः सम्प्राप्तः सारस्वरूपः प्रसादभागोऽपि तैरेव स्वद्यते स्म। गृहेषु रथ्यासु ग्रामेषु जनपदेषु च सर्वत्रैवाहवनीयाग्निसमुत्थितः यज्ञधूमः परिव्याप्य जनानानन्दयति स्म, भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती कर्णान् तोषयति स्म, अवसरपठितं सर्वं सुभाषितं जनान् सत्कार्येषु प्रवर्तयति स्म।'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इत्यस्य निर्देशवाक्यस्य परिपालनं जनैः सादरं क्रियते स्म।**

असारभूत इस संसार के अत्यन्त श्रेष्ठ और पवित्र भारत देश में न केवल गुरुकुलों में अथवा वनप्रदेश की सीमा के क्षेत्र में स्थित मुनियों के आश्रमों में ही अति शुद्ध यज्ञ के स्वाहाकार और वषट्क्रिया किसी देवता को आहुति देते समय उच्चारण किया जाने वाला शब्द वषट् कहलाता है से समुत्पन्न अमृत देवताओं के द्वारा प्रतिदिन चखा जाता था। अपितु घर-घर में संस्थापित यज्ञवेदिकाओं में प्रज्वलित अग्नि के माध्यम से दी जाती हुई आहुतियों से प्राप्त सारस्वरूप प्रसाद भाग भी उन के द्वारा ही चखा जाता था। घरों में, गलियों में, गाँवों में, नगरों में सर्वत्र ही आहवनीय अग्नि से उठी हुई यज्ञधूम सर्वत्र व्याप्त होकर लोगों की आनन्द देती थी। भाषाओं में मुख्य मधुर, दिव्य देवभाषा संस्कृत कानों को तुष्ट करती थी, समय पर पढा गया सब सुभाषित लोगों को सत्कार्यों में प्रवृत्त कराता था।'जहाँ स्त्रियाँ पूजी जाती है वहाँ देवता रमण करते हैं' इस निर्देश वाक्य का परिपालन लोगों के द्वारा आदर के साथ किया जाता था।

**तत्राधुना सम्भवतः काचित् शिथिलता जाता। अधुनापि कुलीनाः पर्यवदातश्रुताः शुचयः जितात्मानः प्रकृतिज्ञाः प्रतिपत्तिज्ञाः प्रशान्ताः शंसितव्रताः पुण्यश्रवणदर्शनाः सन्मार्गवक्तारः श्रेष्ठाः जनाः भारत-भूभागे सुप्रतिष्ठिताः सन्ति। यत्र तत्राध्वरधूमः परिव्याप्याहवनीयस्याग्रेः संस्थिति-मपि संसूचयति। किन्तु शिथिलता तु समागतेवेति स्वीकरणीयं वर्तते स्वस्थेन मनसा। पूर्वस्मिन् कालेऽपि राक्षसाः यज्ञविध्वंसं कुर्वन्ति स्म, वर्तमानकालेऽपि केचित् पापवृत्तवचः सत्त्वाः सूचकाः कलहप्रियाः लुब्धाः शठाः परवृद्धिद्विषः त्यक्तधर्माणः नराधमाः यत्र तत्रोत्पातं कुर्वन्त्येव। विशेषेण तु व्यभिचाररताः परस्त्रीभोगसंलग्नाः बलात्कारिणः जघन्यममुं पापं कुर्वाणाः जनमान-समतीव संक्षुब्धं कृतवन्तः। भारतस्य विभिन्नक्षेत्रेषु छद्मस्वरूपे संस्थिताः ह्येते नरपिशाचाः घृणास्पद-मेतत्कर्म कृत्वा निर्लज्जतां प्रकटयन्ति जनांश्चोद्वेल-यन्ति। किञ्चिदधिकं घटितमधुना। जागरिताः हि जनाः संनद्धाश्च रक्षकाः प्रशासकाश्च, देशनगर-**

**निगमजनपदप्रधानाः सर्वकारस्य प्रतिनिधयोऽपि च रौद्रं क्रोधं पुरस्कृत्य बलात्कारिणां समूलोच्छेदने कटिबद्धाः प्रतीयन्ते।**

वहाँ आज सम्भवतः कुछ शिथिलता आ गई है। अब भी कुलीन पूरी तरह शुद्ध और पवित्र वचन सुने हुए (निर्मल ज्ञान से युक्त विद्वान्) पवित्र, जितात्मा (संयमी), प्रकृति को जानने वाले, कर्तव्य काल को जानने वाले (प्रतिपत्तिज्ञ) परम शान्त, जो कुछ कहें उसका पालन करने वाले (कथित प्रतिज्ञा वाले), जिन को सुनने और देखने से पुण्य प्राप्त होता हो ऐसे, सन्मार्ग को बताने वाले श्रेष्ठ लोग भारतभूमि पर सुप्रतिष्ठित हैं। जहाँ तहाँ यज्ञ की धूम परिव्याप्त हो कर आहवनीय अग्नि की संस्थिति को भी सूचित करती है। लेकिन इसमें शिथिलता तो आ ही गई यह तो सच्चे मन से स्वीकार करने योग्य है ही। पहले के समय में भी राक्षस यज्ञ विध्वंस करते थे। वर्तमान काल में भी कोई वृत्त (कर्म, आचरण) वचन और मन से पापमय, चुगलखोर, झगडालु, लोभी, धूर्त, दूसरे की उन्नति से द्वेष करने वाले, धर्म का त्याग करने वाले (अधर्मी) अधम (नीच) पुरुष जहाँ-तहाँ उत्पात करते ही हैं। विशेषरूप से तो व्यभिचारी, परस्त्री संभोग में संलग्न, बलात्कारी लोगों के जो कि इसे इस जघन्य पाप को करने वाले हैं उन्होंने जन मानस को संक्षुब्ध कर दिया। भारत के विभिन्न क्षेत्रों में छद्मरूप में स्थित ये नरपिशाच घृणास्पद इस कार्य को करके निर्लज्जता प्रकट करते हैं। और लोगों को उद्वेलित करते हैं (झिंझोडते हैं)। इस समय कुछ अधिक ही घटित हो गया है। लेकिन लोग जागरूक हो गए हैं। रक्षक और शासक संनद्ध हैं, देश, नगर, निगम और जनपद के प्रधान तथा सरकार के प्रतिनिधि भी भयङ्कर क्रोध को आगे कर के बलात्कारियों के समूलोच्छेदन के लिए कटिबद्ध प्रतीत हो रहे हैं।

**भारतसर्वकारेण बलात्कारिणां कृते कठोर-दण्डस्य प्रावधानं कृतम्। मृत्युदण्डेनापि दण्डनीयाः सन्त्यधुना बलात्कारिणः। बलात्कार-सम्बन्धिन्येकाऽपि घटना यदि देशस्य कस्मिंश्चि-दपि भागे दैवदुर्विपाकाद् घटति तर्हि तस्याः प्रचरणं तत्कालमेव सर्वत्र जायते, यतो हि संचारसाधना-नामत्यधिको विकासः परिव्याप्तिश्चाप्यधिका वर्तते। दुर्घटनास्वेतास्वबोधस्वरूपात्मिकानां कन्यानां धर्षणं श्रुत्वा तु महाकष्टमनुभूयते सज्जनैः नागरिकैः। श्रूयते यदादिकाले ह्यदितिसुतस-मौजसोऽतिविमलविपुलप्रभावाः प्रत्यक्षदेवदेवर्षि-धर्मयज्ञविधानाः शैलसारसंहतस्थिरशरीराः प्रसन्न-वर्णेन्द्रियाः सत्यार्जवानृशंस्यदानदमनियम-तपउपवासब्रह्मचर्यव्रतपरा व्यपगतभयरागद्वेषलो-भमोहक्रोधशोकमानरोगनिद्रातन्द्राश्रमक्लमाल-स्यपरिग्रहाश्च सात्विकाः पुरुषा बभूवुरस्मिन् भूभागे। किन्तु तस्मिन् कालेऽपि चण्डासूय-कौपधिकाः शूराः अननुक्रोशात्मकाः दुःखशीला-चारोपचाराः राक्षसवृत्त्यात्मकाः राजसाः नर-पिशाचाः बह्वीषु दुर्घटनासु लिप्ता आसन्।**

भारत सरकार ने बलात्कारियों के लिए कठोर दण्ड का प्रावधान कर दिया है, अब बलात्कारी लोग मृत्युदण्ड से भी दण्डनीय हैं। बलात्कारी सम्बन्धी एक भी घटना यदि देश के किसी भी भाग में दैवदुर्विपाक से

घटती है तो उसका प्रचार तत्काल ही सर्वत्र हो जाता है, क्योंकि संचार साधनों का अत्यधिक विकास और व्यापकता भी अत्यधिक है। इन दुर्घटनाओं में अबोध कन्याओं का धर्षण (अत्याचार) को सुनकर तो सज्जन नागरिक महान् कष्ट का अनुभव करते हैं। सुना जाता है कि आदिकाल में अदिति पुत्रों (देवताओं) के समान ओजस्वी, अत्यन्त निर्मल और विपुल प्रभाव वाले एवं प्रत्यक्षतः देव, देवर्षि, धर्म, यज्ञ का अनुष्ठान विधिपूर्वक करने वाले, पर्वत के समान दृढ एवं स्थिर शरीर वाले, उज्ज्वल वर्ण और निर्मल इन्द्रियों वाले, सत्यवादी, सरल स्वरूप वाले (कपटरहित), दयावान् दानी, आत्मसंयमी, नियमों में रहने वाले, तप-उपवास-ब्रह्मचर्य एवं व्रत का पालन करने वाले, भय-राग-द्वेष-लोभ-मोह-क्रोध-शोक-मान-रोग-निद्रा-तन्द्रा-श्रम-क्लम-आलस्य और परिग्रह ये सब जिनके दूर हो गए हैं ऐसे पुरुष भी इस भू-भाग में उत्पन हुए हैं। किन्तु उस समय में भी अत्यधिक क्रोधी, असूया (ईर्ष्या, असहिष्णुता) रखने वाले, कपटी, शूरवीर, दयाभाव रहित, सर्वदा दु:खपरक आचार-विचार वाले राक्षस वृत्ति वाले, रजोगुण की अधिकता वाले नरपिशाच अनेक दुर्घटनाओं से लिप्त थे।

**तादृशानां मनोविकृतियुक्तानां दुष्टानां संहरणं तस्मिन् कालेऽपि प्रशासकैः कृतम्। अधुनापि प्रशासकाः तादृशानां दुष्टानां संहरणं करिष्यन्ति, एतादृशीषु घटनासु शीघ्रमेव नियन्त्रणं-भविष्यतीति मे मतिः। एतादृशीनां दुर्घटनानामा-धिक्येन प्रवर्तनं वर्तमानकाले कथं जातमित्यपि विचारणीयं वर्तते। अधुना धूर्तैः दुर्वृत्तं क्रियते, कुत्सितविचाराणामश्लीलसंवादानां चित्राणाञ्च प्रचरणमपि विभिन्नैर्दुर्युक्तैः संचारसाधनैः निर्बाधरूपेण क्रियते विकृतविहाराहारशीलैः कामासक्तैः पिशाचात्मकैः दुर्जनैः। दुष्प्रवृत्तीना-मश्लील-चित्राणामन्येषाञ्चैतादृग्विधानां धर्मध्वं-सकानां संस्कृतिविनाशकानां च विचाराणां ध्वजवाहकं तु प्राथमिकरूपेण वर्तते ह्येतत् 'इण्टरनैट' नामकं सञ्चारसाधनम्। यद्ध्यत्युप-योगि सदपि नियन्त्रणं विना दुर्विचाराणामपि संवाहकं वर्तते। तत्र तु नियन्त्रणमत्यावश्यकम्। Subscribe (सबस्क्राइब) इत्यनेन शुल्कं गृहीत्वा दुर्जनाः प्रत्यक्षरूपेणाश्लीलप्रवृत्तीः वितरन्ति, यूनां युवतीनां किशोराणाञ्च परिपक्वान्यपरिपक्वानि च मनांसि दूषयन्ति। नियन्त्रणीयाः ह्येतादृग्विधाः दुष्प्रवृत्तयः सर्वकारेण।**

उस प्रकार के मनोविकारयुक्त दुष्टों का संहार उस काल में भी प्रशासकों के द्वारा किया गया। वर्तमान काल में भी प्रशासक उस तरह के दुष्टों का संहार करेंगे, इस प्रकार की घटनाओं पर शीघ्र ही नियन्त्रण होगा ऐसा मेरा मानना है। इस प्रकार की दुर्घटनाओं की प्रवृत्ति वर्तमान में अधिकता से क्यों हुई है, यह भी विचारणीय है। इस समय धूर्तों के द्वारा दुराचरण किया जा रहा है। घृणित विचारों का, अश्लि संवादों का और चित्रों का प्रचरण भी गलत ढंग से प्रयुक्त आहार-विहार का सेवन करने वाले, कामासक्त, दुष्ट नरपिशाचों के द्वारा किया जा रहा है। दुष्प्रवत्तियों का, अश्लील चित्रों का तथा इस तरह के अन्य धर्मविनाशक और संस्कृति विनाशक विचारों का ध्वजवाहक तो प्राथमिक रूप से यह

'इण्टरनैट' नामक सञ्चार साधन है। जो कि अत्यन्त उपयोगी होते हुए भी नियन्त्रण के विना दुर्विचारों का भी संवाहक है। इस पर नियन्त्रण तो अत्यावश्यक है। सब स्क्राइब के द्वारा शुल्क लेकर दुष्ट लोग प्रत्यक्ष रूप से अश्लील प्रवृत्तियों को वितरित करते हैं। युवकों, युवतियों और किशोरों के परिपक्व या अपरिपक्व मन को दूषित करते है। इस तरह की दुष्प्रवत्तियाँ सरकार के द्वारा नियन्त्रित की जानी चाहिए।

**मानसविकृत्यपहारकाणां सुसंस्कृतस्वरूपात्मकानां धर्मपरकाणां पापवृत्तिविनाशकानां सुसंस्कृतिमभिवर्धकानां सद्ग्रन्थोक्तानामुपदेशवाक्यानां प्रचारणं प्रसारणञ्च करणीयमेभिरेव 'इण्टरनेट-टी.वी.-चलचित्राद्याधुनिकैः सञ्चार-साधनैः'। प्राथमिक-माध्यमिक-महाविद्यालयीयासु शिक्षण-व्यवस्थासु च पाठ्यांशरूपे श्रेष्ठानां मानसिकस्वास्थ्याभिवर्धकानां तत्संरक्षकाणाञ्चोपदेशवाक्यानां पाठनस्य संभाषापरिषदां व्याख्यानानां प्रवचनानाञ्चायोजनमपि करणीयम्। आयुर्वेदीयसंहितास्वेतादृग्विधानामुपदेशवाक्यानां बाहुल्यं वर्तते, येषां शारीरिकेण मानसिकेन च स्वास्थ्येन सम्बद्धता प्रत्यक्षरूपेण वर्तते। तेषां तर्कसहितं व्याख्यानमपि वैज्ञानिकरूपेण कर्त्तुं शक्नुवन्ति दक्षाः ज्ञापनसमर्थाः ह्याचार्याः। अध्याप्यमध्यापयन् ह्याचार्यो यथोक्तैश्चाध्यापनफलैर्योगमाप्नोत्यन्यैश्चानुक्तैः श्रेयस्करैर्गुणैः शिष्यमात्मानं च युनक्ति। केषाञ्चिच्चरकोक्तानामुपदेशवाक्यानामुल्लेखनम् अन्यस्मिन् लेखे करिष्यामि।**

मानस विकृतियों को दूर करने वाले, सुसंस्कृत स्वरूप वाले, धर्मपरक, पापवृत्ति का विनाश करने वाले, सुसंस्कृति को बढाने वाले सद्ग्रन्थों (सत्साहित्य) में कहे गए उपदेश वाक्यों का प्रचार और प्रसार इन्हीं 'इण्टरनेट, टी.वी., चलचित्र इत्यादि' आधुनिक संचार-साधनों से किया जाना चाहिए। प्राथमिक, माध्यमिक, और महाविद्यालयीय शिक्षण व्यवस्थाओं में पाठ्यांश के रूप में श्रेष्ठ मानसिक स्वास्थ्य को बढाने वाले और उस (मानसिक स्वास्थ्य) का संरक्षण करने वाले उपदेश वाक्यों को पढाने की व्यवस्था आवश्यक रूप से करनी चाहिए। इस को ध्यान में रखकर सम्भाषा परिषद् और व्याख्यानों तथा प्रवचनों का आयोजन भी करना चाहिए। आयुर्वेदीय संहिताओं में इस तरह के उपदेश वाक्यों की बहुलता है, जिनकी शारीरिक और मानसिक स्वास्थ्य से सम्बद्धता प्रत्यक्ष रूप से है। दक्ष और ज्ञापन समर्थ आचार्य उन उपदेश वाक्यों का तर्कसहित व्याख्यान वैज्ञानिक रूप से कर सकते हैं। पढाने योग्य छात्र (या श्रोता) को पढाते हुए आचार्य निश्चित ही कहे गए अध्यापन के सम्पूर्ण फलों (शास्त्रपुष्टि, पुण्य, यश आदि) से तथा अनुक्त कल्याण कारक गुणों से शिष्य को तथा अपने आप को जोडता है। चरक में कहे गए कुछ उपदेश वाक्यों का उल्लेख दूसरे लेख में करूंगा।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,